श्चयः॥ नयप्रश्रविनयः कीर्तिः पराक्रमणशक्तिता॥ इत्यादयो विभावास्फारिति॥ युद्धवीरे हर्षगर्वामर्षधियास्मि

शा॰टी वारिणः॥ असहायेपियुद्धेशासमशादपलायंनंनातानयप्रदानाद्या॥ अनुभावाः॥ प्रकीर्त्तिताः॥ उत्साहस्थायिभावश्चसुधी
५२ रावीरबनाधिरे इति॥ अत्रविभावानुभावावुपनिबद्धौ व्यभिचार्यादयस्त्वपमृह्नीयाः॥ आश्रा नाप्य तानित्युक्ते तौ व्रति
नियोगः कृतः स्यादित्याश॥ आज्ञापयित्वामिकामीत्युक्तो॥ प्रार्थयन्तेस्याश्रमपदं इति विभक्तिविपरिणामेन सम्बध्यते
तत्र नवतः प्रस्वस्याद्याविति भगवत इति पाठः॥ तदातत्राशंसंनिधानादिति सम्बन्धः॥ एषा इदानीमनुकूला अस्य॥
थिनातेतव॥ बाणासनं धनुः॥ महद्वयस्था आज्ञापयाति॥ अनुकारिणीति॥ इवेषां उरुप्रवृत्तीनामनुकारिणीसदृशीवा
रिष्येणशौर्येणदानेनवार्यावित्रयेणेत्यादि ज्ञेयं॥ युक्तरूपमतिशयेनयुक्तं प्रशंसायां रूप श॥ आपन्ना आपद्युक्ता॥ अ
यत्र आपन्नाः स्यादित्यमरः॥ तेषां पदं येन देवसत्रे यज्ञविशेषस्तत्र दीक्षिताः इति परं पारिरूपकं अनेनावश्यक
र्त्तव्यत्वेन यापसारणस्य ध्वन्यते॥ वल्कु यस्मादितनेन श्वर्वीद्वंप्राति हेतु ता[illegible]लिंगमापि॥ अनुपदं नवत्यदन्या
संलक्ष्मीकन्यानन्तरमेवेत्यर्थः॥ पादन्यासे पादमुद्रायां तिउ तेपदंनवैदादितिस्वामी॥ प्रथमं सपरिवाहमासीन्ज
लनिर्गमनमार्गिवा वीपरिवाहशब्दो निर्गमसम्बन्धेनाधिकं जलन्नपातियदाधिकं नवतितान्निर्गच्छतीति यावन्नतिबन्धः ५२

फलं॥ तदेवाह॥ इदानीं राजन्नयवृत्तांतेन बिंदुरपि नावशेषितः अत्रापि बिंदुशब्दोऽल्पस्य लक्षकः॥ एवं राज्ञा सा उदन्तितोऽस्मि
।सत्तो रथो न तु विजयप्रस्थानमपेक्षते॥ एवमुक्ते नगरादेवी नामं वानामा [illegible] हरः करन क आगतः॥ अह इति तथेति
एवमनंतोपसर्प्य॥ जयपत्रं नद्ये देवकं वाक्यं ज्ञापयति॥ आगामिनि चतु[illegible] दिवसे भूतपारणे मे उपवासो न विधास्यति
।पूर्वमुपवासवचनमश्रवणमस्य उत्सवदेन विधास्यतीति भूतिपारणमिति शयममुपन्यस्तं॥ तत्र दीर्घाघाः वर्शं पश्यमाव
नीयेति॥ प्रातिविधेयं कर्तव्यं॥ विशंकुरि वांतरालेतिष्ठ इत्यादि विदूषकवचनेनोपहास्यावतीति॥ स्फुटैव॥ अन्केव॥
विदूषकस्य हास्यरसनायके हास्यकारणमिति॥ तत्र त्वया गंतु॥ मा प्राणोक्ति विषाणं क्रियायाम्य विकारतः॥ लोल
देश्वपरस्थानामेषामनुक्तेरपि॥ विकारस्त्वेतसो हस इति॥ एतस्यापि हास्यं इति ज्ञेयं॥ कृच्छयोरिति॥ कार्यिपोमिन
सो हि द्वीनवनं नामैकत्रापर्यवसाने॥ उपमाने तु मार्गद्वयगमने उभेभिन्ने स्थविसमानधर्मार्थमतिशयो वस्याप कव
नाभ्यवसितो॥ पुरायेरोले प्रतिहतमवरोधे प्राप्तं श्रोतो वहो नद्याः श्रोतश्च॥ अन्यदल्पं स्रोतः शोलावरुद्धंति पदे
वतितसे वं विपदो पादानेत्राप्पि नदीपदाघनावेन पादावरिष्टस्य ग्रहणं तेन माला [illegible] न दीर्घं घनितं॥ हत्यनुप्रासः के कान्तु

शा॰टी मासयोः संसृष्टिः। उपमा। वा न खलु मां रक्षोभीरुकं गणयसि। न वत्ति तव पि। यथा राजानुजेन गंतव्यं तथा गच्छामि। अत्रा
५३ नुप्रासिकानुप्रासयोः संसृष्टिः ॥ उपमा ॥ न खलु मां रक्षोभीरुकं गणयसि ॥ न वत्ति तव पि। यथा राजानुजेन गंतव्यं तथा ग
च्छामि ॥ तेन नहि युवराजः ॥ अस्मीत्यहमपीदानीं संवृत्तः ॥ अत्र तत्पुरे न्यस्तास्थास्त्वीप्सः ॥ कव पामिति। वयं का वय
मित्यर्थं तिरसंकामितवाचं तेनानेकराजोपचारयुक्तत्वकामकलाभिज्ञत्वे नानावैदग्धीकुशलत्वं च व्यज्यते ॥ मृगशा
वैर्हरिणबालकैः समं सह ॥ अथ च तुल्यमेधितो वृद्धिं प्राप्तः अत एव परोक्षमन्मथः दुरमुक्तमनोभवः कामकलान
भिज्ञ इत्यर्थः ॥ एवं चित्तपदार्थसमर्थनार्थं शास्त्रपदं तेन नावकारत्वं परिहासेन विविधं जल्पितं यत्र तद्भवः शकुंतला
यामनुरागकथनरूपं परमार्थेन मा गृह्यतां ॥ नरूक्तवदामासः ॥ वृत्त्यनुप्रासः ॥ काव्यलिंगं पदार्थवाक्यार्थं वा का
र्यरूपेण ॥ पूर्वार्द्धे विषमस्येको भेदः ॥ सहोक्तिश्चावैतालीयं वृत्तं ॥ अन्ये तु ... अबोधितो मन्यते ॥ राजा त्वगातामि
त्यादिना एतदंते न संहतिर्नाम संध्यंतरागमुपाक्षिप्तं ॥ तल्लक्षणं तु संहतिः स्वयमुक्तस्य स्वयमुक्तस्यापत्तं यं प्रच्छादनं
न चेदिति इति श्रीमदभिज्ञानशाकुंतलटीकायामर्थद्योतनिकायां द्वितीयोऽङ्कः ॥ ॥ ततः प्रविशति·स्त्र ५३

चरात्तु सनिराकारेण कारणेव लब्धो कार्यरूपकर्म निरूपयतोक्तः पर्यायोक्तालंकारः ॥ काकथेति ॥ बाणसंघाने
का कथा नाराचसंधानं नापेक्षत इत्यर्थः ॥ सधनुषः ज्याशब्देनैव विघ्नान् इह रक्षोऽपहरति निराकरोति । केनेव हुंकारे
णेव त्र्यंबक देशविवर्जितमुपमा । तेन रामेण गम्यते पत्नुपमानत्वं गम्यते । प्रथमा । सः ज्याशब्देनैव हरति । विघ्नानपाक
रोति कथं भूते नेव धनुषः हुंकारेणेवेति समासोक्तिगर्भोत्प्रेक्षा धनुषश्चेतनत्वारोपादनयोः नायासेन रिपुनि
वहणं ध्वनितं । आस्थितमाह धनुर्ज्याशब्दयोरर्थपौनरुक्त्यं परिहृतं भवति । आकाशे इति किं ब्रवीष्येवमित्यादि
ष्वेनापात्रे ब्रवीति यत्तत्र अन्यैरनुक्तमप्याकाश्याद्याकाशे नाघितमिति । नाट्यधर्मायं । आकाशे आकर्णेन मा
नितं यत्पार्श्वान्ते न शिरसा स्तब्धेन नेत्रेण तत्पश्चात्पार्श्वस्थानि मुखं युतुलत्वात्पार्श्वान्त मुच्यते । प्रयुज्यमा क
णितादौ पार्श्वस्थस्यावलोकने पत्नुसा विश्वलपुटस्तब्धे नेत्रे भवन्तीति इति आतपेन पल्लवेन मा तिक्रमस्तस्मा
दत्यंतातपक्लान्ता पादित्यर्थः । बलवदधिकमत्यस्थमत्वास्थ्येयस्याः सा न्यायप्रधानो निर्देशः ॥ शरीरनिर्वापणा
यशरीरेण तापशांत्यर्थं कुलपतेः । काण्वस्य उच्छ्वसितं जीवितमिति रूपकं वेलानिकेतनं संबंधिविलानं यत्तद्वि

शा॰टी सान्त्यादिविशेषः। विसर्जनीयाभिविसर्जनीयेष्वाभिवर्त्तमानसामीप्ये वर्त्तमानवद्वेति लट्। शुद्धविष्कंभक इति तत्र
५४ वेणीं सुष्ठु करोति तत्र विष्कंभको भूतनाविवक्षितत्वाच्छायवकः। अमुख्यपात्ररचितः संक्षेपैकप्रयोजनः। द्विधा संस्कृतमि
श्रः स्यान्नीचमध्यमैः। शुद्धः केवलमध्यमपात्रेणैकानेककृतो द्विधेति तदयमेकपात्रकृतत्वाच्छुद्धः। अत्र दुष्यंत
स्याश्रमान्तरागमनं कृततपस्विकार्यहेतुना निराकुलत्वं भूतस्य वनोद्यानकुतलताभ्यासात्तपस्विव्याजेन विर
हावस्थाकथनं न विष्कंभकत्वमिति ज्ञेयं। कामयते कामयमानः विरहीतस्यैवावस्था यस्य स तथा। क्वचित्काम
यान इति पाठः। सोप्यनित्यमागमानुशासनमिति मुक्तिकृते साधुः। तथा च वामनाचार्यसूत्रं। कामयान्तर्य
यानशब्दः सिद्धोनादिश्चेदिति। तत्र राजानकमम्मटेन व्याख्यातमनित्यमागमानुशासनमिति मुक्तिकृते साधुः।
तथा च वामनाचार्यसूत्रं। कामयानशब्दः सिद्धोनादिश्चेदिति। तत्र राजानकमम्मटेन व्याख्यातमनित्यमागमानु
शासनमिति। यद्वा कामस्य याने ऽऽमनेऽऽरोहणे वा या अवस्था अभिलाषा यस्यास्ता यस्य सः। जान इति। अहं तप
सो वीर्यं जाने। ब्रसस्पृहयन्तीयानवतीति नावः। ब्रसस्पृहयन्ती पञ्चमावेकार्ये ब्रह्मक्ते यदब्रह्मकृतं तपसो वीर्यं ५४

ज्ञान इति कारणमुक्तं। सा प्रकृत ग्रथसा-तर्हि सेवागमिष्यतीत्य तस्याः स्मेति। सा बालाश्च श्रगल्भापरवतीत्युभयं वि
धेयं। अयं बालो न विघ्यतीत्याह। इति मे विदितं। मे इति मया इत्यर्थे निपातः। ननु त्वं वा मना वार्यसे। ते मे शब्दौ निपातौ
त्वया मयेत्यर्थे। संबंधे वा षष्ठी। एवं पृष्टापि तया पिततः न्यक्कृतलायाः सकाशात् दृढं मया सहसैव दृढं मोवपरित्यज्य ह
णमावपरिवितेश्वासक्तामिति निर्णीके। हृदयं निवर्त्तयितुं नालं समर्थास्मि। त्वयं न निवर्त्ततिमयापि अशक्यनिव
र्त्तनमित्यर्थः। वेदनाक्रियाया हृदयानिवर्त्तनाक्रियायाश्च विरोधः तदा मासक्तरति तस्या स्याताः वृत्तेन स्मृत्यनुशासे
मदनुबाणानिरूप्यति। लोलालितेवाशिरसा दोलनहस्तकेनम्नन्यपदृष्येमारिदृत्यं। तल्लक्षणानि तु। शिरसा श्रोलि
तेसर्वादिक्षः शिथिलल्लो च नैरिति। लंबमानोपताको चुल्लष्यासो शिथिलांगुली। दोलो भवेद्दसाविति। समताश्र
दादृश्यदृष्टिःशून्या विलोकिनीति। अथवा दोलस्थाने कर्कटं त्रुपाठ। तल्लक्षणं तु। अन्योन्यस्यांतरे पंचांगुल्यो लि
ःस्ततालहस्तयोः। अंतर्बहिर्वा दृश्यं ते कर्कटः सोमिधीयते। अंततः स्थितांगुलिः पृष्ठे तं गुलीनां हृनं दक्षणः। विलापम
यएव देवा तिमूलवयंत्यां सरंनावंचे कराः कर्कटादयः। विषमपादिदैवापि प्रायः ज्ञेया। स्यात्तोमतोमनस्यमता। इति का।

शा०टी मिजनसार्थोविरहिसमूहइत्यतिसंधीयतेवंच्यतेइतिसमोवेववनेइतिगणेपाठात्।।विश्वसनीपान्यामितत्रविशेष्या
र्थोहेतुत्वेनोपात्तोनोपात्तोवर्गतयः।।तवेति।कुसुमशब्देनैतत्पेलवत्वं।अत्रत्रूर्मिकाप्यवंदस्पृसावेत्युक्तेतवेतिव
५५ सर्वनामपरामर्शोन्यायोनेष्टुमदोषादानंतेनत्वमस्यहृदयमितिपठनीयं।।अयथार्थेऽसत्वहृपार्थतेनाविपरीतार्थ
मितस्यर्थः।विरुद्धार्थत्वंनत्र।मातृदेवभ्रविरहिविन्यर्थः।अत्रत्वमयीतिविशेषेश्रक्तितेसामान्योक्तेनश्रक्ततेसामा
न्योक्तेनश्रक्तेतत्रशंसा।अयथार्थेत्वंअत्रतावांहेतुत्वेनाहाविसृजतीतिहिमगनैरितानेनकालत्रयेप्युत्वमा
त्राशंकापिनास्तीतिव्यज्यते।अवज्रसाराविज्ञसाराकरोषियवज्रवसारीकारोविदृढीकरोषि।काव्यलिंगरूप
कमुपमावा।।हिमगनैरराश्मिमितिगुणरव्ययोःअत्ररत्वरव्ययोर्विरोधः।विश्लेनस्वानाप्यानासत्वं।वूर्मिकया।
श्लोकद्वयीदयथासंख्यालंकारः।।तंवेतिमिंदोर्मिदमितिहेकानुप्रासोवृत्त्यनुप्रासश्चमालिनीहत्तेउत्तरार्द्धेत्र
मध्वक्रमनंगोविरहिणोरातोवचनामितिपरिहर्त्तव्यः।।तामिकुसुमबाणाववज्रसाराविषशोविस्त्रजतिसवच
क्रिशीतगनैमयूखैरितिवापावेशीतपदोषादानोत्रउद्देशप्रतितिनिर्देश्यायेरकेनद्दोषादानलक्षणोगुणः।।हेतु ५५

शब्दानुपादानकथितपददोतल्लक्षणं तु दृष्टनष्टानुसरणं परिसर्प इति स्मृतः। अहो इति। अकस्माद्दालतस्य स्पर्शसंज
ातसुखेनाश्चर्ये भक्तिकृष्टो वा ततः अवातस्तेन लघुनगो मनोहरः। अ असौ नागच्छेत तत घर्मः सदेशेन संभवतीति मुख्या
र्थबाधेन यो मनोहरः स लघुनगो न भवतीति कार्यकरणं संबंधेन मनोज्ञत्वेन लक्षणया नवविराहिमतो विनोदनत्वादिकं
ध्वनति॥ शक्यामिति। एतादृशाः पवनो नगसंतसैरंगैरविरलं गाढं यथा स्यात् देवमालिनिगीतं तुं शक्यं। मालिनी
वृत्तं गाणाम् इत्यतेन तरंगोत्सादनोक्तेर्मंदत्वं ज्ञेयं। अत्र पवनो गान्याल्लिंगतीति वासैय दैपरी तं तेन तेषामातेता
नवमातिशयसंतापत्वं तस्य व तदूरीकरणेन सुखदायित्वं व्यज्यते। अत्र श्रियादर्शने नात्मविनोदनं लक्षणका
र्यमारनमाणस्य पवनोऽपि तत्कार्यसहायैः पवनोपात्त इति समालंकारः। वृत्त्यनुप्रासः कार्यारंभे सहायाप्तिरिति
लक्षणात्। अमालि मालीति रूः वृत्त्युत्थपस्योपादानात् छेकानुप्रासो नुस्सः श्रुत्यनुप्रासः कस्य वनेन सह एववा
वकानुप्रवेशात् लक्षणः संकरः। वृत्त्यनुप्रासश्च॥ अरविंदवत् मनोज्ञः शीतलः पवनः पवित्रः सत्वाश्लिंगतेन सुखे
सुत्यादयतीति समासोक्तिरपि सुगंधो वमनो ज्ञेव वाव वसुरानिः स्वत इति विद्वः। न नु पवनस्य सर्वत्र वस्तु दौ न

रा॰टी तानस्यातिरोहितत्वात्पवनस्यालिंगितुं शक्य इति तस्य मनोविनोदनहेतुत्वं कथमिति चेन्नाउच्यते। इमामुग्रातपं देवं
मालिनीतीरे शुश्रूषंते लागमयतीति शर्वमुक्तेरत्र च मालिनीतरंगाणां कामावारे मुक्तेर्नायिकासंस्पर्शत्वेन तेन विनो
५६ दकारित्वमुक्तमेवान्यत्र तेनान्यत्रापुष्यं शक्यालिंग्यं तेगुणवातिमपाते त्रुघारा रेवातात: शर्वस्पर्शत्वं यदिकिल्व नवेदं
गमेतन्नित्त्वेवति॥ ननु शक्किसहेष्वेतिकर्माणि यतिक्र तशक्यमिति रूपं तेन सहपवनस्यापि न्नलिंगस्य सामानाधि
करणं प्रकृत इति चेन्न महानाप्रव पवनास्मिन्देशे शक्यं ग्रीष्मासादिभिरपि त्रुम्नति हेतुमिति। वामनोपि। शक्यमि
तिरूपं विलिंग च वचनस्यापि कर्माभिधायां सामान्योपक्रमादिति॥ अमुं न्नेतेति। पुरस्तात्तादाग्रामनागेऽस्मुन्न
तालं वसापेक्षमिति पश्चाद्भागमापेक्षयोन्नतत्वं तद्धेयं। पश्चात्तात्सिदिशे जघनगाढानिम्ना इति त्वमावोन्नेः अभिनवे
त्यनेन नवातायश्चिप्ट्रत्वान्नुष्या ताकालिकागमनं तेन तामन्वेषयतस्तस्यतद्दर्शने नाविरे हसिद्धि सूचिता। एता
दृशीपदं पंक्तिः प्रतिबिंबितपादतलपंक्तिः अलक्तेत सन्नतामे उपस्यपांडु: सिकतापच्चात्तास्मिन् दृश्यते न तमतिबिं
वैपोग्पत्वं पांडुशब्दनोद्दीपकत्वं यावरम्य मुञ्जलं वे गुत्तेः द्वारेऽवन्यपेत तद्वशात् स्वर्गनार्थद्वारग्रहणं सुखेन न ५६

पयालतामंडपंप्रविष्टेति कारणेन वक्तव्यं यत्तत्कार्यरूपपदयोक्तिवर्णनं तत्पर्यायोक्तं ॥ अत्र राजा लतामंडपंद्वारेण
गतोस्ति तत्र दृष्टनागएवास्तित एव पदपंक्तो दृष्टिः पतिता पदपंक्तिस्तु प्रवेशसूचिका ॥ अतएव दृष्टं पुरोनागस्य
पश्चाद्भागस्येति वर्णनमिति चापि प्रक्रमभंगो नाशंकनीयः ॥ नोजेनेनु ॥ अत्यन्तमन्नेनेत्नामिति प्रश्नालंकारो गौ
क्तः ॥ छ ॥ दाहृतं ववीन्नेतेस्मरशननकेर्नेव वद्योतीति तेन पदपंक्तिर्दृश्यत इति वापि प्रक्रमभंगो नाशंकनीय ॥ अत्यन्तालं
कारः ॥ सदृशासदृशयोः ज्ञानमुपमानमुपमानं द्विधेदं तत्र स्यादेकमनुभूतेर्थे ॥ ननुभूतेद्वितीयकमिति तेनैवोपमाना
लंकारउक्तः ॥ तेनात्रापि पश्यम्भ्रमन्ततो विशिष्टपदपंक्तौ तत्रागमित्यमितिज्ञानं सोयमनुभूतार्थविषयउपमानाल
कारः ॥ अथवा विशिष्टपदपंक्ताथवेतस्य हेतुत्सद्भावानुमानादनुमानालंकारोपि ॥ यदाहुः ॥ अपि वास्त्यनुमानेपि
साहृश्यं लिंगिनाः पदेन पद्यवस्तुरूपादानुमीयत इति ॥ कृचनुप्रासश्च ॥ विटपांतरेण शाखावकाशेना ॥ अंतरमे
वकाशावधी समरः ॥ नेत्राति र्वाणंनयनानंदमित्यतिशयोक्तिः ॥ नापिकालज्ञागा स्वविषयस्य निगार्णलो तारामनो
रथप्रियतमेतिर तोर निर्वाहाः ॥ विश्रंतकथितानि विश्वासनणेतानि ॥ समौ विश्रंभविश्वासौ ॥ वितामरः ॥ पा

मा०टी
५१

योक्त्यायायारामदनबाधया शीतलशयनतलनिपतनादिर्व्यापारः स्मपीति रुक्षो मुखयति नालिनीपत्रबालः सी
वीजयतो मांसखो ऽनेन नतानाधिक्यं तनस्त्वन्या विषयासेवयघ्नवघ्नति तं विषयनिवृत्तिश्चावस्थोक्तः ॥ अनेन
विवृतमंगमुपन्निश्वा तत्स्नातं तु विवृतं स्यादरतिरिति ॥ विषादेनाटयिवेतिश्रु तेनाशीरसाविषस्त्तपाद श्चावति
तेयो तत्त्वेन्नो ॥ पर्यायेण शनैस्तिपिगात मुक्तं श्रुतं शिरः विषादेनास्पितेहेय्यामिति ॥ यादृष्टिः पतिता पांशावित्तारि
तेषु रहृदय ॥ निमेषिणपत्ततारा वविषक्ता सा विषादिनीति ॥ परस्परमवलोकयत इति शंकामूर्धकं ॥ बलवद
धिकं स्कृतमलमित्यर्थः ॥ कृतमिति निवारणनिषेधयोरिति मोजस्कृतसरस्वतीकंठाभरणविवृतौ ॥ —— नेति ॥
स्तनयोर्न्यस्तमुशीरं नलदानुलदानुलेपोपत्रनतत ॥ अत्र तरुणीस्तनो हिमकालच्छेदे —— ष्मकाले शीतल
विनिकामशाखमयीदा ॥ तत्काले तु तयोस्ता दृशोरपिस्तनयोस्तापाधिक्यं घातयितुं स्तनन्यस्तेत्युक्तिः ॥ नह
दिन्यस्तेति ॥ शि शिलिष्थिलितं मृणालस्यैकं मुख्यं वलयं पत्र स्तेता प शुष्कवेन शोधितं स्ने... एकमिति तेन नव
लयांतरामावः ॥ वलयस्य करएवनियामितः स्थितेः श्रामलानदन्ग्रहणे ॥ आमं तापी तुद्वयासहवर्तमानेत्या ५१

ऽपीडाप्रयुक्तंनत्वपितुपीडयास्य हृद्वर्त्तमानं।एतेनकतिपयकालकलाज्ञानितापिपीडाशरीरोत्पत्तिकालादार
भ्यैववर्त्ततइतिध्वन्यते।ईदृशांग्रीयायाइतिसाभिप्रायं।वस्तुतःकिमपिलोकोत्तरचमत्कारकारिकमनीयमितिविवे
यं।एतादृशसेतापेपिसतिश्रतिशयशोभायुक्तमितिनावकाशमित्यनुमतौ।निष्कामानुमतौ।काममित्यमरः।
मनसिजनिदाघश्चस्मरयोस्तापः[illegible]यद्यपितयापिग्रीष्मस्ययुवतिषुश्रपसद्भूतापरूपंवापिशोभतयापरिहृ
श्यमानंस्मुनगनत्वंतैनैवेतिव्यतिरेकः।उत्प्रेक्षादेवबश्चरणइत्यमरः।तेनकामेकृतएवायंपरितापइतिभावः।
युवतिष्वितिसाम्य।‐न्यानिईशादश्शक्ततत्वशंसा।ग्रीष्मस्येतिसंबंधमात्रेषष्ठी।स्तस्तइतिकिमकमेतिहैकानु
श्वासश्च।।अत्रयद्यपिकथितपददोषाभियाग्रीष्मापराम्रष्पदेनपानेनेतयापितन्नोचितं।अत्रोद्देश्यविधेयनो
वविधेयतयातदेवदातव्यंनवेतरदितिसवितातात्रस्तात्रएवास्तमेतिवतिवत्सः।एतद्व्यतिरिक्तविषयत्वात्क
थितपदस्यऽप्यपवादवि[illegible]यंपरितायेवोन्सर्गस्यप्रवृत्तेस्तेननिदाघस्येतारग्युवतिषुततापस्तुमनगइति
पठनीयं।अस्मिन्पाठेषष्ठीदोषोपिपरिहृतः।।अनसूयेतस्यराजर्षेःप्रथमदर्शनादेदारभ्यपर्युत्सुकेवशकुं

तत्वतस्तस्यां मिथ्यारोपणनियोगरूपशब्दोपादानं किंतु खलु तस्यास्तादृशि भिन्नो मातं वेणं न वेत्ता सखि मम मानि इह
रीघ्रा शंका हृदयस्थाम मयापि हृदयस्येति संबंधः। हृदयग्रहणेन तस्मिन्स्फुरणमात्रमुक्तं। न तु तत्वतः अतए
वाशंकापदं। न च तु भ्रसामिता वदेनां। स त्विन्न छ्वासि किमपि बलवान् खलु ते संतापः। हूर्वोद्धेनेति शरी
रस्येति शेषः। हृद्वर्णोति पाठः शरीरादिनेत्यर्थः। किं वक्तुकामासि अभ्रमन्यंतरा तत्त्वेनाज्ञाः खलु निश्चितं वयं म
दनगतस्य वृत्तांतस्य। तस्यां मिथ्यारोपणियो वा तानप्रकाशनशर्वश्रुम्ना। किंतु यादृशी इतिहासनिबंधेषु
कामयमानानां विरहिणां अवस्था श्रूयते तादृशीमवस्थां तव पश्यामि। ज्ञातेपि श्रवणमेव कारणमुक्तं। न
तु स्वयमन्यस्य प्रत्यक्षतो दर्शनम् अवस्थायास्तस्मिन्नस्तीति अस्य सतप्त्वसंभावनास्यात्। किं व निरूपणापित।
स्मादृश्येनैव निरूपणं न तत्वेन॥ कथय किंनिमित्तं ते संतापः। विकारं खलु परमार्थतोऽज्ञात्वानारंभः।
प्रतीकारस्य। उक्तं च। यथावद्वस्तुपरिज्ञानमिति। दर्शनं ज्ञानं। बलवान् अधिकः खलु निश्चितं मे अभिनिवेशः ५८
आग्रहः अकथनं इत्यर्थः। अभिनिवेश आग्रह इति गणः। पा मता। इदानीमपि एतदवस्थायामपि एत[illegible] अस

ङावेसत्यपीशब्दार्थः सहसाऽकस्मादग्र्यैवरयवत्समाणाद्वा शङ्सेन्यक्तिः। एतयोरितिसख्योस्तत्रापिप्रियसखं
ख्योः रहस्यानेदिन्याः मदर्थं ज्ञाणपरितोषार्गेत्योरितर्मीतरसंक्रामिता शङ्कोऽमितितरां सामस्त्ये न वेदपि तेऽमुष्य एषा
नणाति किमात्मनज्ञातेनमुपेक्ष्य अनेनममापि वञ्चमाने प्रायोस्तानुक्तोऽन्नुदिवसं खलुपरिहीयसेऽङ्गैः
शर्वस्वभावनएवकृशाऽधुनाततोऽपीति भावः॥ केवलं लावण्यमयीच्छायातो न मुंचतितया अधुना लावण्यमेवद
र्शनियोग्यं नावयवा इति भावः। अतितथ्यमत्यां यस्त्वाशिषं वदति समसौ न वदति। उपेवदासत्यं वचनापीति विरोधः
नाम्नातदाभासः। तयोगेः परिहीयसेऽनुक्तेऽरितरा जपितदेवश्र्याति तथाहीति। नामेति। नामन्नामो कृशतरो। शर्वं
कृशावधुनाकृशतरो कपोलौ यत्रतदाननेऽधरः काठिन्येनमुक्तोऽस्तनौ यत्रा नदिदमपि कार्श्यादेवा। शर्वस्वांतः कृा
शाऽधुनाल्कां ततरोमध्यः अमाऽशर्वमेवा विनताऽधुना एकाममत्यर्थं विनतौ। छविः पांडुरीतिविरहकार्श्याद्वाशा
व्यापि व्यदर्शनावेति विरोधाभासो याऽनुकंपाहीतितदाभासः। मदनेनक्लिष्टा इति शोभ्यवै हेतुत्वापादानात्काव्य
लिंगं। केवमाधवी वासंतीलतेवा कीदृशा शोच्यतेऽनेनेतिशोचनः करणा। [illegible] करणयोग्यावातिलघुदूतेन एवाणा

शा॰ टी शोषकेन मरुता पश्चिमवायुना स्पृष्टस्तु तस्या अपि शोषक इति किं त्वं माधवी शङ्के न प्रियदर्शनत्वमुक्तं लता आत्र-
५९ स्यो वकान् यसंभवात ५ एमा उज्ञासे ॥ शार्दूलविक्रीडितं । वक्त्रं त्वामकपोलकं स्पृशमुर इति त्वं तत तो सपुष्पमर्षकेन स्पृ-
ष्टविरितिपाठे ५ ३ ६ ··· यत्रातितिर्ईश्यप्रक्रममनंगः प्रकामाविशत्प्रोर थपीनस्तनं वपरि हृतंनवतिः संस्पृष्टादलशोष-
णेन मरुता सामाधवी वा प्रियाइतिपाठे रव प्रयोप प्रक्रममनंगः लतान्वा हस्यावकरत्वं वनं नवति । कस्य वा व्यस्पक-
यायिष्यामि आयासयित्री ५ वयोरिदानीमावेष्याम्यतो न कथयामीत्यर्थः । अत एव खलु निर्बंधः । यदेवाकथनेका-
रणं तेनानिषद्धं तदेवकथने कारणं तेनानिषद्धं तदेव कथने हेतुनोपन्यस्तमिति व्याघातालंकारः । सोकर्येण कार्यवि-
रुद्धक्रिया वेति तल्लक्षणात् ॥ स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवतीत्यर्थान्तरन्यासः ॥ दृष्टेति जनेनाधिहे-
तेरष्टा इयं कारला मनोगतं सत्यं नवक्ष्यतीति त्रिना अपि नु वत्स सेव एतदर्थमेव नन्दद्वर्पा । बालेति केतवान निस्तत्वं । सत्यव-
चने हेतुगर्भविशेषणमाह । समदुःखसुखेनेति काव्यलिंगं हि निश्चितमनया तरला पतलो वनया सन्दृष्टं सा सिला-
लेपयथास्या देवं विहृत्य बहुशो दृष्टोण्यहृत्रं तरेऽस्मिन्नवसरे अयेण तद्धवः श्रवणेकातरतां नीतिं प्राप्तोऽस्मि । किं वत्स ५९

तीति न पामित्यर्थः। न वा नेवाति तिमत मेति छेकानुप्रासो वृत्त्यनुप्रासो वा वसंततिलकं वृत्तं सखि पतः प्रभृति मम
दर्शनपथमागतः स तपोवनरञ्जिता राजर्षिः। ततः प्रारभ्य तदुतेनाभिलाषेण एतदवस्थास्मि संवृत्ता॥ स्मर इति॥ यत्तप
हे त्वस्मि एवाति र्वापयितेति विरोधाभासः। वस्तुतस्तु तत उ तस्मररक्ता पहेतुर्नायिकागतो निर्वापयितेत्यर्थः। अतए
वमेश्वतिकूलदैवं स्मरेण मां तापयति। इयं ते नैव मां निर्वापयतीति प्रतीतेर्भङ्गो व्याघातालंकारः। यथा तापितस्य
स्यातयैवा। न्यैनान्यथाकरणं व्याघात इति लक्षणात्। तत्रोपमामाह। दिवस इवेति। न पातयेन्निदाघातपप्राव
उरेण इत्यर्थः। अर्द्धद्वारपामः अर्द्धमेवाकांतलात्वामः सखायः शर्वरीक्रमात्तपत्रपरत्वसत्वायेवा दिवसः जीवलोक
स्यतापयिता निर्वापयिता वयथा भवति। वृत्त्यनुप्रासः यतः पहिप्रुवपोरनुमतं तदा तथा वर्त्तेमात पत्र परत्व सत्वा।
यावद्दिवसः जीवलोकस्य तापयिता निर्वापयिता वयथा भवति। इत्यथा पंतपत्र परत्व सत्वा यथा तत्प्रराजे पिरनुक
पनीयानवामि। अन्यथा। शपांसि वंतमेतिल्लोदकां अनेन तस्योपशमनं पत्नुशमनं तदुदाहृतामिति लक्षणात्तर्श
मोनामो गामुपनिहिता इगत यन्म यात्त्रमाकाल्हरणस्य। अत्राद्यावस्यो त्रयं प्रथम एवोक्तं। तनुतानेनत्र मेव।

गी॰टी
६०

काविषयानिवृत्तिःका किंवीजयंतिमांसख्याविसृज्य का। एतयोरग्रेऽभिलाषाकथनादेवत्रयाणामनाउक्तः परिहार्योऽव
स्यात्रयमेवावाशिष्टमिति इरगतमन्यथत्वंतथावकद्धयेतयनश्रीतिः प्रथमा चिंता संमस्ततोयसंकल्पः। निद्राछे
दस्तनुता विषयनिवृत्तिस्त्रपानाश। उन्मादोमूर्छाधृतिरित्येताः स्मरदशा दशोवस्फारिति। ननुपूर्वमभिलाषः
चिंतनेत्यादिदशावस्थाउक्ता। अधुनातुनयनप्रीत्यादयइति पूर्वापरविरोधोनाशंकनीयः। आचार्यमतभेदात्
। अतएवोक्तं। अभिलाषाद्यवस्थानांवस्तुः प्रीत्यादिकास्त्वपिसंभवादितश्चापितासांस्यादेकमेवतत्रविरंत
नय्यासिद्धात्तुधिविद्यकथिता इमाइति। यस्मिन्नुद्धतावासानुरागाए एवासल्ललामभूतः प्रधानं पौरवाणांतात
स्माद्युतोऽभिलाषाऽभिनंदितुं। पुत्रमितिप्राकृतत्वाल्लिंगविपर्ययः। प्रथमायांवाद्वितीया। यथाभूणसितन्न
येवेतत्वर्थः। हिश्चादैवेनानुरूपस्तैऽभिनिवेशः। सागरमुत्रित्वाकुत्रवामहानदीअवतरति। कइदानींसहका
रमंतरेणाअतिमुक्तलतांपल्लवितांसहतेस्वकीयत्वेनपरिगृह्णातीत्यर्थः। मालाद्दष्टांतः। पूर्वत्रनापिकायाकृ
ष्टैवमुनेरत्रनायकस्यातिविशेषः। हिदेवतावादिशात्वयाहिवं। पुत्रमेवेतयोरेतस्याअनुमोदतामितिना
६०

वा। एतदलिप्रायमवविशाखयोर्दिव्वं। शाशिलेखालेनच्छीलिमानिर्दं शाश्व विशाखेश शांकलेखा वाश्च तु तात
सांवववनादश्वक्त श्वरतयं सातयावसखोः शकुंतलायाश्च श्वकृतानांयोग्यसमागमलेनसमालंकाशेव्यज्यते।
।कः पुनरूपापोन वेता। येनाविलं वितंशीह्नानिमृतंगु मनसरखोः शकुंतलायाश्च श्वकृतानांयोग्यसमागमलेन
समालंकाशेव्यज्यते। कः पुनरूपापोन वेता। येनाविलं वितंशीह्नानिम्हतंगु मंवसखामनोर्थसंपादयावः। निवृ
तामितिवितनीयंनवेश्रीछुमितिसुकरं। कथमिवाननुसराजर्षिरसंपात्क्रिग्धदृष्टिः सूचिताभिलाषः एतानिदिवसानागर
कोश। लक्ष्यते। दिनानीतिकालाघ्वनोरत्यंतसंयोगाद्वितीया। अनेनराज्ञानिवेद्दतनुतेजको। अस्य पुरूपतातिद्विशेषतो
राजाद्यात्ववापित्वयंपुष्यंत इतिविषानिवृत्तिचपानाशलत्नेणेऽवस्थ्यए नप्रतिनवार्गितो। अधीरलेनत्नेनावित्यवस
गाता। ८२दामिति। निशिनिशीच्यनेनदर्शनात्वन्वृतिश्चघपांवदतदवाख्याघोातिता। नुजेउपधानानी। हृतेन्यस्तायोय
मपांगात्त्रवप्रसर्तुशीलंयेषांतेः। अश्ववअगागातशय्यायांपरिवृत्तविवर्तनै मल्पमुपधानेतस्यानिष्फलत्वा
पुनोपधानत्वमुक्तं। अतस्तापादारीशिरेरूभेरङ्गनिर्दिवर्म्मीमणयोयत्रतता। अविवर्णामाणिविवर्स्ममाणि

शा०टी

६१

पादितं॥ विवर्णमसीकृतं॥ अनेनापि दीर्घकालमियमवस्था व्यज्यते॥ स्वभावत एव कलयस्याशीथिलेकाम्यावस्थाक्ष
ततनुता प्रतीतिर्नेनवतीति॥ तस्य त्वभावाच्छिथिलत्वकविशेषणमाह॥ नष्प्रमिलुलितः॥ ६७॥ उत्पाद्यं ताकोयेन ततन
तत्र्पारिनागेगाठत्वेनास्थितत्वादेतादृशं कनककवलयं॥ कनकेति॥ शोतसद्योततताप वलयमिस्ये कवनेन विरहित्वान्स
र्वाभरणपरित्यागो द्योत्यते॥ स्वसंस्वस्ते वारं वारं पाणिमूलमागतं कार्श्याद्वमणेर्वंधनमत्रप्रमाणिवंधनेनुअपा
एयोः संधिः तस्मान्मया राज्ञा उत्क्षिप्तेनापि सतामुहुर्वारं वारं ननु सहस्र प्रतिसार्यते॥ उन्नीयते॥ स्वनावानि॥ अयमध
जागरते हृता वेवकारणेवक स्येयत्नयोस्स्य कनकवलय प्रतिसारणेव कार्यमुक्तं तेनपर्यायोक्तं॥ लवलिङ्गातिष्ठेकानुप्र
सः॥ यथा काश्चिदुत्सिरस्त्रीर्णिविवर्णिः बंधनाद्विसार्यत इत्याक्षिप्तेशः॥ हरिणीवृत्तं॥ मदनलेखत्वस्तस्मै क्षिपतां॥ इमं म
दनलेखं देवपवसादाव देसणदेहीन्याजेनसुमनोगोपितं कृत्वा तस्य हस्ते प्रापयिष्य॥ युष्मगोपितं कृत्वेमं देव
प्रसादव्याजेन हस्तमस्य प्रापयिष्य इत्यन्वयः॥ विरहिण्याः स्वावस्थाभूतकानि वद्धोलेखस्तां मदनलेख इत्युच्यते॥ ए
वतमेव कुमारः प्रयोगः॥ किंवा शकुंतलामणतिरकोनियमा विकल्प्यते विवार्यते दोतुमितिशेषः॥ तेन हि आत्म ६१

नउपन्यासश्शर्वं विंतयता वंन्नालितपदबंधनं॰लालितं वतत्पदबंधनं वेति इदमेव विशेषणं क्वचिल्लालियपदबंधाएं
शलिष्यामीतिपाठः शालितफामितस्यार्थः। तउक्तं मोजेनपदांगिके कानिर्वतमुक्षितेवावकादिभिः नर्तकैरभिनीयत
श्रेक्षं शैवाल्मिकादितनरातल्लास्यं तांउवं वे वकालितामित्यादिना। लास्यछलितशंपादिश्रेद्यार्थमितिकाव्याद
र्शापि। छालितलक्षणंएपया। रतिक्रोधोत्साह नावश्रवानंछलितंमतामिति विंतयाम्पहं। श्रवधीरणातिरस्का र
स्तेननीरु पुनर्मेवपते हृदयं। हृदयं पुनर्वपत इति संबंधः क्रियायां विशेषणं हेतुत्वेनयोज्यं॥ अयामिति। हे नीरु
अनेनतिरस्कारेशंकासंमावना यजते। यतोमल्लक्षणक्ष्मनादवधीरणाशंकसस्यादवधीरणाशंकायादिके
वलं मत्प्रार्थनातदीयप्राप्तिहेतुःस्यादितिमावः। सोपामितिश्रचक्षणानिर्दिशाति॰सुंदराति विषये प्रतिहेतुत्वया
ज्यं॰ तेतवसंगमोस्तुकांक्षिषाति। इतिविशिष्टस्य विषयत्वे॰ तत्प्रार्थितः कथंउक्तेनोनविष्यामीत्याशयः। स्वर्वापरवर
णायोर्थ्येतायपाठे नउहेरयप्रतिनिर्दिश्यैश्रक्रमनंगः परिहरणीयः। प्रार्थयितापुरुषः स्त्रियंलमेतवानलमेतवा
स्त्रियापुनः प्रार्थितः कथंउक्तेमानवेन। अयमर्थं तिरन्यासः। वातायपठितस्पशर्ववाक्यस्यश्वंवाक्यसमर्थक

गा॰टी ताहृगुत्तरस्योत्तरं समर्थकमिति विवेकः। न त्वत्र सामान्यस्य समर्थकत्वं वक्तव्यं श्रीशब्दस्य विशेषवाचकत्वादत्र कार्यं त
न्निर्वाहः इति वा लक्ष्मीसरस्वतीधीस्त्रिवर्गसंपद्विभूतिशोभासु उपकरणे वेषरचनागुणे शुभ सरलद्रवे पुंकथिता श्रीरि
६२ ति मा॰उ॰ कोशाद्द्वातिशयोक्त्या शोभाभारतीलक्ष्मीधीवेषरचनाविभूतित्रिवर्गसंपन्नीनामेकस्थैनाध्यवसानात्सा
मान्यवाचकत्वं अतिशयोक्तिः सर्वालंकारमूलत्वाच्चालंकारान्तरेऽतिवृत्तिश्छेकानुप्रासः। कथं नलस्योत्तगुनः श्रियार्थित
इति पाठं पठित्वा पर्यायक्रमभंगः परिहरणीयः। वंशस्थं वृत्तं आत्मगुणावमानिनीति तत्कुणेरव सर्गीतोव धार
णासंभावनापि केति भावः। काउ इत्यं तीशारीरा निर्वापयित्रीसारदीशरकालरसे। बध्विनामि यातिन्यायोक्त्या आ
दकारितं। ज्योत्स्नापटं तेन वारयति। शङ्कितलावाकं चैतिदृष्टौतः। नियोजिता उद्दामनीलिमकामलेखरेख्यार्थं
विस्मृतः निमेषोपेन तेन न निर्निमेषेणोलयः। एतदर्थमेव वक्तृधाविशेषस्योपादानं श्रियं नख्वीमात्रं दृष्टवरीमध्य
ने कथं शङ्कितिज्ञेयं यदवलोकपामिततस्थाने प्युक्तं खलु। अथवा स्थाने अदेयाद्विशेषेऽवामितातौ। एतादृशस्य सर्वमद
नकृततरमिति भावः। पदानि ध्रुतिं उ॰ तानि रवयं ---- अस्या उन्नमिततउच्छिताएका मूलताय चं॰ उदेपदं देयामि ६२

दंवेत्तिवितर्केतस्याः प्रयोगात्तदाननं कंटकितेन कपोलेननैवैकामूलताउन्नमिततादिकुस्थकपोलस्येवरोमांचि
तत्वमित्यधर्माधानलक्षकावक्त्रं। मपीतित्वस्याधिकरणेनेवनधन्यतांपुमेगांमन्यतोवध्नंतिअनुरागंस्त्रीतिविज्ञेयंप्र
थयतित्रिंसति। अयमन्यास्मिन्नन्यधर्माधानलक्षणःसमाधिर्नामगुणःनवतंतातिरस्कृतवावात्स्यधनेर्विषयः।
पयावदतिविप्तितीपत्रशयनमिति उक्तंच।। ध्वनिकृताःरूढापेविषयेन्यत्रशब्दाःस्वविषयाद्दृषिलावण्याद्याः प्र
युक्ताप्तेनमर्वतिपदंघनेरिति। एतेरेवषष्ठीअवस्थाऽनुरागःउक्तं वसुधाकरे। अंकुरपल्लवकालिकाप्रसूनफल
भोगमार्गीयंक्रमशः। प्रेमामानःप्रणयःस्नेहोरागोनुरागइत्युक्तेति। अनुरागलक्षणं वतश्चैव। रागएवससंवेधद
शाप्राप्याप्रकाशितः। यावदाश्रयवृत्तिश्चेदनुरागइतीरितः। भोगस्योत्तरलक्षणमविवादात्सिसजातइवेतिमत्वाएतादृ
शुक्तिः जातिरलंकारोनुप्रासश्च। रोमांचितकपोलान्यथानुपपत्त्याऽनुरागप्रथनादर्थापत्त्यलंकारः। केचिदनु
मानालंकारमाहुः। साधकबाधकप्रमाणाभावादन्येसंदेहसंकरमाहुः। मूलतामिच्छपमावउन्नमनस्यासाधक
वाउः मूलत्वेनयथाउद्भिन्नतांसंगतात्वर्याक्रमेणसहवानपाश्लीणांकोपावितर्कश्चदर्शनेश्रवणेनिजाधुर्यमूला

गी॰टी लोहेलयोऽङ्गैर्वकायोः शिखाविनद्धोऽणोरितिसंगीतरत्नाकरे। चिंतितं मया गीतवस्तु न खलु संनिहितानि ध्रुवं ल्ले
६३ खनसाधनानि। एतास्मिन्रयुको दरसुकुमारेनालिनीपत्रेनखेर्निकंचयिष्वन्तमनोरथात्यंगानि अहं तु वप्यनु
रक्तातव हृदर्पं न जाने रक्तामरक्तो वा। अथवयदि रक्तं हृत् तदा मदनो ममांगानि दिवापि रात्रावप्यधिकमति
शयेन तापयति। यतस्त्वयि ष्विन्नमनोरथानीति हेतुत्वेन योऽस्मि। अंगानीति बहुवचनेन मार्दवातिशयोद्धानि
तः। तव हृदर्पे तापयति नातापयति वा न जाने। अंगानीति सामान्योपादानात् हृदयमिति विशेषोपादाना
शक्त्योक्तं ठातिशयस्तस्य तद्भावेऽप्युच्यते। अथवा रक्तं तापयति वत दान जाने किमयं यदद्यापि एतादृशोल्लासा।
पि न द्रवति। एतदनुसंधायैव निष्ठुरपतिसंबुद्धिः सा वैस्या कृतमेवस्या इतस्त्वन्मावच्चान्नस्याः इति दुःखातपरुषो
क्तिः। अर्थान्तरालंकारः। अथवा तवहृदर्पंगा घुरकपाटायमानं रिपुदनुजनिवहप्रारब्धातेरप्यतेषां एवंभूत
महं न जाने ऽपि तु जाने आत्मज नव वनान्ते। अत एव मेऽङ्गानि सर्वाणि दिवापि रात्रावपि तापयति कामः तव तु व ६३
द्वौ मात्रमपि न तपपि तु शाक्तः। यदि तापयेत् तदानिर्घृणानिर्गुणस्मि निदाघसमयग्रीतलतरमकुवपरीरंभण।

यागाद्धेः। घृणा जुगुप्सा कृपयोरिति विश्वः। ताहशी तव वक्त्रस्य आलिंगितुमिच्छामीत्यभिलाषोक्तिः। अनुमानालं
कारः। अथवायं मल्लहूणो जनस्तव हृदन्तर्हृदयरूप इति रूपकं। कामः पुनर्ममाङ्गानि यन्त्रापयतीति तन्नजाते इति श्वे
षकाकूः। नैव तापयतीत्यर्थः। तेन त्वद्रूपमप्यशक्येति भावः। समासोक्तिः। तं तु एताहशो निष्कृपः। यद्धृदयरूपा
मपिमां न परित्रायसे। अथवायं जनस्तव ---- हृत्स्थः कामः पुनर्ममाङ्गानि यन्त्रापयतीति तत्स्थं न जाने ऽपि तु जाने वक्रो
क्तिजित इत्यर्थः। तेन तव हृदयं कठोरतानापयितुं शक्तोऽसि। अतस्त्वं कृपया ममाङ्गमस्ति तापयतीति भाव इति वा। उक्ति
ः। श्वसनीकालंकारः। प्रतिपक्षैः त्वत्कारात् शक्तौ तदीयं प्रतिरस्कारः अतनीकमिति तत्सल्लक्षणात्। एवं वेताहशानि
र्व्वृणो यस्त्वदर्थेऽपि अपमानामपिमां रक्षसि। अथ च अपि विषये ह्नताऽजाता मनोरथा येषां तानि। आलिंगनं तु भुज
योम्भिनोरथास्तत्कोऽतिरुरथवा हपानं तु वक्त्रोऽप्यस्ति। द्वन्नाम्नातस्मरसी निमज्जनेन प्रवणायोस्तन्मुखसरोज
त्वासाघ्राणेन सोऽः। शशांककोमलत्वदंकारोहणानि तेब स्यव्वलाति रतल्पमलनं तु नयोरिति याघ्येवं भूतमनो
रथानि ममाङ्गानि कामो धिकं तापयति। एवं निष्कृपो यस्त्वं मत्कान्यैव परागतान्यपमानान्यपि सहसेतेन वहु

मा॰ टी दयमहंनजानेत्वंत्वत्कृतादयमितिनजाने।परेःपीड्यमानंत्वांत्रियःपरित्रायतेस्वनकंतुसुतरामित्युपालंभः।कामोममां
६४ गान्यधिकमत्यर्थंतापयतित्वंतुनहृदयमत्यर्थंनतापयतीत्यहंनजानेयतस्त्वंदिवसेनिष्कंपःलोकादिनयारूए
वैराग्यावपिनिष्कंपोसियदभिसरणेनाकार्षीरितिवोपालंभः।अथवहंतुकेनाभिप्रायेणमवहरसीतिन्हृदयं
लज्जाणयाहृदयानिप्रायंनजाने।कामःपुनर्ममममसंबंधीपुरुहृदितिनावःपल्लविदृत्तमनोरथान्यंगानितापय
तिकिमितितास्मिन्नीदृशेशठेअनुरक्तानीतितत्पुंडःखेदवाशिन्नपतीतिवोपालंभः।एवमहकृतार्यरातिंप्रतिपेता
दृशोपालंभंमदानाउन्मादावस्थाप्युक्ता।अथवनिष्ठपेनकृपापत्रतस्यसंबोधनंहेकृपालोयस्तुसंगुलीयकंदत्वा
सख्याःसकाशान्मांमोचितवानासितस्यतवहृदयमहंजनजानेअपितुजानेअयंतेदयाशीलमितितान्निर्निश्चयानिष
वयोरित्यमरः।ममपुनर्मदीयंहृदयंनजानेतातुत्वपिवेत्तितेतदनावातहृदयमून्याहेवर्तेइतिनावः।केवलंतेदव
त्वयिगतमितिनअपितुअंगान्यपित्वयिलीनजातमनोरथानिः।केवलमंगान्येवेतिनअपितुकामोभिलाषोपि
त्वयिविषयेदिनेरात्रौअपिवृद्धिंकंतपतिवर्द्धतेलज्जाणयाइत्यर्थईंतुनयोक्तिः।तेनमदीयंवाह्यमाभ्यंतरंनाकिंचिदपि ६५

मत्तं बद्धमितिशीघ्रमागच्छेतिनावः॥ श्लेषानुप्रासौ॥ क्वचिद्दत्तिंपीतिपाठः॥ तदा रात्रिमयी तदर्थः॥ कालत्रयस्थ नोरतस्यंत
संयोग इति द्वितीया॥ ए॥ क्लिष्टेत्यनेन वर्त्मागमुपाक्षिप्तं विरुद्धवचनं यत्तु व— मित्यधीयत इति मरतोक्तेः॥ लेखनी
मत्कं संध्यं तरागमुपाक्षिप्तं॥ विदग्धेति तादर्थ्ये कालितापा त्रिकाले खेदव्यत इति॥ तपतीति॥ तनून्निगात्राणि यस्यास्ताः संबो
धनपदार्थः कृशगात्रतं तद्वीवं नतिकाव्यलिंगं॥ तनुगात्रीति पुनरुक्तवदाभासः॥ मांगेषु नभ्युक्तयं परुषगात्रमं
निशं सर्वदा त्वय्येवनिष्ठां व्यतिरिक्तसमयेपि दहन्त्येवेत्यव कारणं किमपि नावडोषयतीव जतेराद्रा विषपातरा
सत्यमानात्ता दुर्वितादाहः अन्यदापि विषयान्तरमासक्तचित्तेपि दहतीति॥ यथाहि वसः शशांकः कमलपयति तथा कुमुद्व
तीनाः पितुमुकुलयतीत्यर्थः॥ अत्रापि प्रलपनेतदभावकाले किंवे प्यधिवां हर्षवच्चामिति विशिष्यार्थः कमेण हृ
द्वेवेनयोऽयः द्रष्टान्तोनुप्रासश्च॥ मदयतीति मदनो हर्षदः सकथं तपति दहतीति विरोधाभासश्च॥ तागतमवलंब
नोरथ्यस्येति॥ रूपलक्षणां विषयनिराकरणादिति शायोक्तिः॥ अलममलमिति द्विरुक्तिरादरार्थे॥ संदृष्टे तिय
तो गुरुमहान्यरितः सर्वतस्तापः संतापाये तु ता निश्चितो विशेषणद्वयं वाक्रिष्टानि लेखे तवगात्राणि स्त्रवयवा

मा॰टी रुपचारंतल्पयोग्यव्यवहारणांनार्हति।गात्रमंगेकलेवरे इति विश्वः।दष्टलयंनैअपित्रसमाकुदष्टंकेवलंकुसुमेन
६५ स्नपितंकुसुमस्रायनीयनीयंयेषुतानि।गात्राणामुत्स्नापनेकर्तव्येकुसुमस्नात्यापंगलश्चाप्तिष्ठतीतिभावः।आयु
शीघ्रंकांतोवितंमेगात्त्वद्वत्तेनवासुरमीणिवारुणाणि।शीघ्रंवनंगोपन्नयातेनताम्रकालिकल्पकांतवामितिनाम्न
कनीयो।क्रिययाततद्वानूपदार्थोलक्ष्यते।ऊत्र्यचैवसाधिक्यादिप्रयोजनमुन्नेयं।इतःशिलातलैकरोतुवयस्यः।द्वयो
नेतृयुवयोरन्योन्यानुरागःश्रुतस्तःसखीस्नेहोमांपुनरुक्तवादिनींकरोति।आपन्नस्यायस्यामस्यविषयनिवासि
नोदेशानिवासिनोजनस्यार्तिहरेणराज्ञानावितमाममित्तेषपुष्याकेधर्मः।आर्तिःपीडाधनुःकोघारित्यमरः।ते
नहिनोऽस्माकंप्रियसखींतामुद्दिश्यइदमवस्यांतरंमागवतामदनेनारोपिता।तादृतदर्हसिअभ्युपपत्त्याखलु
रहेणाजीवितंतस्यास्त्ववलंवितुं।अथाभ्युपपत्तिरनुग्रहइतिशाश्वतः।साधारणआवयोःसमानःप्रणयोपा
म्बा।यथानवतीनिरेतदर्थमहमभ्यर्थ्य।एवंमयाप्येतदनुग्रहार्थमनवद्योप्रार्थनीयइत्यर्थः।प्रणयःप्रेम्णिविश्रंभेयाच्या ६५
श्वोत्सरयोरपीतिविश्वः।अतःउरागविरहपर्युत्सुकस्यराजर्षेरुपरोधेनाकिंःअनेनात्मनोतिशायितंसौमाग्यंद्यानितं।

ऽहंजातम त्वत्स्मृतियेनसहास्थितंतमपिपरित्यज्यदर्शनात्वत्स्मृतिलयत्यनुरक्तामनन्यपरायणांकेवलंत्वान्निषेवामित्यर्थः॥अत्रत्वार
न्निषेवामितिवक्तव्येयन्निषेवमुखेनोक्तिः॥सान्यत्रनिषेवंबोधयतीत्याहुः।शान्तयात्वंजनयाविधिनेवनपर्यवस्यतीतितेनमाम
पिपरित्यज्यत्वय्येवस्थितामितिध्वन्यते॥ममत्वद्ध्यानैकचित्तस्य हृदयं हे हृदयसान्निहितेमयासर्वदाध्यातेइतिसान्निध्यायं
·योयसंनिहितस्सतस्यतत्वंवतस्यसंनिहितासावेवमन्यथाऽननिश्चंयदिसमर्थयसेकल्पयासितदामदिरादृष्टिःत
स्याईक्षणामिवक्षणमवलोकनंयस्यास्तत्संबुद्धिः॥सतम्युपमानश्वेस्योत्तरपदेतिसमासः॥मदिरादृष्टिलक्षणमादि
नरतोऽस्याःसूक्ष्मिमाननममैव्यायाह्वामावांवितततारकादृष्टिर्विकासितापांगामदिरातस्याःणमदइति॥मदनस्यबाणैर्ह
तोविद्धोपिशुनरन्च्यंतहतोस्मि॥निरुद्धमनः॥श्वृत्तिर्जातोस्मीत्यर्थः॥मन्मानसेत्वन्निषेवतदपिवेव्हमत्यपास्मीकसेतस्य
विषयांतराभावाघ्वृत्तिनिरोधोजातएवेतिभावः॥उपमा॥हृदयहृदयेतिलतोहतह्यतिलाटानुप्रासः॥तोत्यपनेदे
तुलाटानुप्रासइतिरुवकोक्तेः॥मनमन्येतिमदिमदेतिछेकानुप्रासःवृत्त्यनुप्रासश्चान्त्यनुप्रासश्च॥तुलानिलंवि
तेवृत्तम्॥अनेनसामेतिसंध्यंतरांगमुपक्षिप्तं॥तल्लक्षणंतुतत्रसामाभेपवाकोस्त्वानुवर्तित्वकाद्यकामितिवय

शा॰टी स्यबहुवल्लभाराजानः श्रूयंते। यथा नोस्माकं प्रियसखी बंधुजनशोचनीया न भवति तथा निवर्त्तयेः। किंबहूक्तेनेति से
मः। परीति। परिग्रहबहुत्वेपि मम कुलस्य प्रतिष्ठे प्रतिष्ठाहेतू द्वे रतिसारोपालक्षणा शुद्धा। कार्य्यकारणभावसंबंधात्
६६ युक्तेवा। सारोपान्यात्तु यत्रोक्तौ विषयी विषयस्तथेति। अन्यैवलक्षणायेन प्रतिष्ठाहेतुर्गौरवहेतुश्च सुरुदधिमेखला
यास्तस्याश्चावेशाद्धृत द्वेशेन पालनीयत्वा। सखी प्रतिष्ठाहेतुः स्थितिहेतुरस्यां महाकवर्त्तिवंशोत्मादकपुत्रोत्पा
दनात्। ते द्वे अपि प्रतिष्ठे अनिक्षिप्ययेत्यर्था एकत्वेनाध्यवसिते इत्यवधेयं। प्रतिष्ठागौरवस्थिता विति हेमः। केद्वे इत्याह। स
मुद्र एव वसनमाच्छादनं मध्यावधित्वेन यस्याः सा उर्वी। मुद्रं स्त्रीतिरातिददातीति मुद्रं वत्वसनं वमुद्रवसनं तेन सहव
र्त्तमानेति सखीविशेषणं। इयं लोकातिक्रांतसौंदर्याश्र गणितगुणगणा निरामा त्रिजगल्ललामभूता तुल्यपा गि।
ता। अनयोः प्रकृतः तान्यस्नया वप्रोष्णितव्या अनया पुस्मारणे तत्त्वास्ण्यामि वास्या बंधुवियोगजनितदुःखोपाकरणे
नानंदपुक्ततयासौभाग्यातिशयो व्यज्यते। अथ च द्वयोरप्यव्यास्तारूप्यमसापत्न्यभावादस्याश्च पितृदत्तावदः। सतिवासाप
त्ने द्वयोर्विवादन वसत्योरवपरस्परं तदिति व्यज्यते। रूपकानुप्रासौ। निर्वहितमुपवितस्त्वः। सख्यो। सहपूर्वैगतमिच्या ६६

दिनाएतदंतेन भगवता नामांगमुपरिक्षिप्तं।। तन्नेत्रेणं।। उन्नतोन्नतरवा।। क्वंतु नवेत्र गयतां।। तु नरिति।। यथा एषइदोदत्तदष्टि
रुन्सु कोमृगपोतको मातरमन्विष्यति मार्गयते एहिसंयोजयावेनं· निर्गमन व्याजव वनामि दं·श्र शरणास्मि एकाकि
न्यस्मीत्यर्थः।। अन्यतरावांयुवयोरागच्छतु हथिवायः शरणंरक्षाकः सतवसमीपे वर्त्तते।। कथंगते एव·श्रा वेगेन सेव्र
मेण।। किंशीतलैस्तलैरिति।। नलिनंपद्मं विद्यते यस्यां सा नलिनी तस्याः दलानि नलिनीदलानि कमलिनीपल्ला
वानितान्येवतालवृंतालवृंतानि व्यजनानि तैः।। नलिनीपदेन सौगंध्यं सूचितं अत एव न बिसिनीपदोपादानं।। व
तुंवचनेन प्रतिरूणां भिन्नाभिन्नस्योपादीयमानतया दत्तविशेषणद्वयप्रयोग्यता सूचिता।। ता एकस्य बहुकालं स्थि
तस्य तद्योगत्वाभावाच्च।। व्यजनं तालवृंतकामिच्चमरः।। आर्द्रवातान् शीतलतरलतरवायून्·आर्द्रत्वेन स्नेहसंल
ग्नत्वेन तदीतिशायः फलं।। समाक्रमेदं मंदं वारयामि करोमिन च द्वेषः।। किमिति प्रश्ने।। कीदृशैः शीतलैः शीतलस्पर्शैः।।
यानि स्वयं शीतलानि तज्जन्यो वायुः सुतरां शीतल इति आर्द्रपदार्थस्य हेतुत्वेन योज्यो।। पुनः कीदृशैः क्लमविनोद
णानुदंतीति तैः क्लांतिहरैर्यानि दृष्टानि स्पृष्टान्याघ्रातानि स्वयं क्लममाच्छिंदंति तज्जन्यो वायुः सुतरां क्लममाच्छिंदतीति भा

सा॰टी वः॥उतेतिविकल्पोमामिवंधादाकानिष्ठंकरस्यकरभोबहिःतद्वदूरूयस्याःतत्संबोधनंहेकरभोरुअत्रानुवृत्तवको
६१ मलत्वादयःसामान्यधर्माः॥तेषुयतामन्नेउक्तोऽशपालोहितोपदिमातीतिपत्नेतेनमहसाम्यंनास्तीतितामत्रवमात्रेण
साम्यंप्रतीतएवतारविंदादिपदोपादानमाकरभोरूपप्रतामत्राविति पदान्यावरणायोःसंवाहनयोग्यत्वंद्योतनितारा
रणांवंकोनिघायेतानेनतस्याभोमाग्यसर्वकषत्वंसत्वस्यधन्यतरत्वंवद्गुक्तिं।पद्यासुखमिच्चनेनस्वस्यसंवाहन
कलाकौशलंध्वनितंसंवाहयामिसंवाहनेनखेदमपनयामीत्यर्थः॥नालिनादलस्यतालवृन्तवरोपणरोप्यमा
णस्य३कृतोपयोगित्वेपरिणामइतिपरिणामालंकारः।१सर्वान्निराद्वयोर्विकल्पालंकारः॥तुल्यबलविरोधेविक
ल्पः१इतिलक्षणात्॥शकोश्यालिंगपरिकरोपमावृत्तिश्छेकान्यनुप्रासाश्च॥वसंततिलकंवृत्तं॥अनेनोपन्यासोनामांग
मुपन्निप्तं।तल्लक्षणंदशरूपकेप्रसादनमुपन्यासइति।अनेनमालानामभूषणमप्युपन्निप्तं।तल्लक्षणंतुमाला
स्यादभीष्टार्थंनैकार्थप्रातिपादनमिति।नमावनौयेषात्मानमपरावपयिष्ठोसुंदरीतिएताद्दगवस्थायामपिसो
दयास्यपरित्यागोनास्तीतिनावः॥अनिर्वाणेत्रपरिणतः॥उत्सृप्येति।परितोबोघापीडायस्याःपेलवैःकोमलैःअं ६१

गैरुपलक्षिताऽइदं परिबाधे च यत्रार्थिहेतुत्वेन योऽप्यात्र यथवा स्याच्छदेत्तुलैनैव योऽजायेल वैरंगैर्हेतुनिरिति कुसुम
शयनमुरस्यमृनालिनीदलकालिप्तं तत्तनावरणमुरस्य अनेन ततो पातिश्चयो घात्यते। अतः आतपेद्वर्मेक भ्यंगमि
ष्यासि। स्वस्योपि वत्त्वावरणादि हित्वा आतपेतत्तु मत्समर्थः। वंतु त्वमावतः सुकुमारांगी तत्रातिपिपासुता त
त्रापीदृगवस्था तत्रापि कुसुमशयनमनालिनीदलादि हित्वा सुतरां गंतु मशक्तेति कथंचनार्थिः। काव्यलिंगं हेतु
वी। श्रुतिवृत्त्यनुप्रासयोः शब्दार्द्धे एकवाचकानुप्रवेशलक्षणः संकरः। उत्तरार्द्धे तु छेकानुप्रासयोरेव संसृष्टिः
दच्यानामोष्ठ्यानां च बहूनां वर्णानां सद्भावात्। अत्र पेलवेति च तत्पर्यायपाठेनाश्लीलदोषः परिहर्तव्यः।
अनेनवोपन्यासो नामांगमुपक्षिप्तं। तल्लक्षणं मदिनरतेऽउपपत्तिकृतो योऽर्थ उपन्यासः स स्मृत इति। पारवा र
तेऽअविनयं। रतेरनिर्वाहः सत्यपि रिवति संबुद्धिः। मदनसंतप्तापि न लब्ध्वात्मनः शत्रुवामि। स्वेच्छया सत्यम
पि गुरुजनपराधीनत्वात् दसामर्थ्यं स्वेच्छया तु मदनसंतप्तेने नोक्ता। कवितु त्वत्के मत्र्यणवा हि आर्त्तेविकरण
आर्तेऽनृणेणप्यहवंतीति पाठः। मदनबाधितापि कन्यका रतिअप्रगल्भात अशंसा। इत्योऽर्थो त्वं तावत्तत्व त

शा॰टी असमत्परिग्रहविषयेतत्रभवान्सूत्रयंकुलयतिःकण्वोदोषंनग्रहीष्यतिायतोविदितधर्मःश्रुतिस्मृत्याचारज्ञ
६८ रेन्यर्थिःधर्मोदत्तेनिवृत्तेबलादित्यानिवृत्तःगांधर्वेणेतिागांधर्वःसमयान्मिथइतिस्मरणान्नन्वयंगांधर्वोविवाहः
अनेनोपदिष्टेनाममनूषणेमुक्तःातल्लक्षणंतुाप्रतिगृह्यतत्रशास्त्रार्थंयद्धाकथमभिधीयतोविद्धन्मनोहरंस्वंतमु
पदिष्टंतदुच्यतोमुंच्यतांवन्मनोनृपोपिसतोजनममनुमानयिष्येााअपरिच्छिन्नेतेतिसुंदरीतिव्याख्यातवरंानवि
द्यतेपरिच्छिन्नंतपस्यसवासोकोमलम्बरम्अथवापरिच्छिन्नेतेभ्रमरादितोकोमलंवतस्याानवस्यप्रथमास्ताघस्यःअ
यवश्चयमाविकासितस्याकुसुमस्येवतवास्यसुधामहोदरस्यमन्तुकृतोपवयलन्पस्याधरस्यापिपासतापातु
मिच्छताघयदेनेवभ्रमरेणेवमपास्मर्दाएतद्विन्नेनाधुनावन्यतरेणासदयंयावउसोमृह्यतेःधरपानंक्रिय
तइतिपावन्रतद्दनंतरंमोहमुनमतिशेषःसदृपामितपनेनबालाल्लालनकोशलद्दानितंपारिकरवाक्येण
मावृतिञ्कन्यनुप्रासःस्यस्येइतिसदसुदेतिष्ठेकानुप्रासोपिामााामालिनारिणीवृत्तंातल्लक्षणंतुाविषमेससस
जेनगेनगेनाविषमेमूर्धेणतुमालिनारिणीपामितिासमुन्नमयितुमितिनिपताकस्योन्नानाम्पदंतेद्रुतंतत्र ६८

मेघ्यमालर्जुनानंयाविभुकादेह्रागतान्यामितिह्नेपानाघेने — तिपराकृत्तेनाशिरसाविनिगूहितेःनाघरेणतित
लक्षणंउ।पराङ्मुखीकृतेशीर्षेरावृत्तमुदाहृतं।तत्कार्यकोपलज्जादिकृतवक्त्रापसारणे।मुखान्तर्निहितःस्ताणः
साध्येषुविनिगूहितःरोषेर्ष्यायोश्चनारीणांबलात्कुंबतिवल्लभनरतिम्।अनेनमुग्धास्वविहारोप्युक्तः।मुग्धानवे
वयःकामारतौवामेति।वक्रवाकवधुसामंत्र्यपश्चात्कृत्तसहचरंउपस्थितारजनी॥इयमप्रस्तुतप्रशंसा।ते
नप्रशंसा।तेनशकुंतलेविघमापश्येतिप्रकृतोगम्यार्थःअतएवशकुंतलामसंभ्रमामित्यादिः।अनेनाद्वितीये
पताकास्थानमुक्तं।तल्लक्षणंदशरूपकेप्रस्तुतागंतुनावस्त्ववक्तनान्योक्तिसूचकं।पताकास्थानकंतत्तुल्य
संविधानाविशेषणामितिवृत्तिकारणेव्याख्यातमन्योक्तिसमासोभेदादितिनत्वान्योक्त्याइदंसमासोक्तयाःग्रिम
संबंधोभाविष्यति।अन्योक्तिलक्षणंरुद्रटः।असमानविशेषणमपिपत्रसमानेतिवृत्तमुपमेयं।उक्तेनगम्यतेपरमुप
मानेतिसामान्योक्तिरिति।एषांस्थानमप्युक्तंमाष्टगुमावार्थैःमुखेप्रतिमुखेगर्भेविमर्शेवववुध्यपिभेदाःसंधि
षुकर्तव्याःपताकास्थानकस्यलितिसंभ्रमंसनयं।पारवश्यंसयंममञ्जरीस्तंतीतापल्लेनाप्याप्रागोतमाइति

६९ एवागमइति।यावद्विटपांतरितोभवामि।इदंव्याजामितिसाज्ञोमनासिस्यात्तत्क्विारणायासंन्नयामिचकक्तिः।नेपथ्यइन्त्या
घेतदेतेनानिशेधोनामांगमुपक्षिप्तं।तल्लक्षणं।उपायानुव्यसनसंप्राप्तिर्निरोधःसतुकीर्त्यतइति।अत्रस्वामीघाघुतिरेवव्य
सनं।इतइतआर्यागौतमीजातेउविग्नअपीतित्रैल्लघुःस्वल्पःसंतापोयेषुतानितथांगानिअस्तिमेविश्रमः।अनेनद
र्भोदकेनदर्भसाहतेनवैतानोदकेनेत्यर्थः।निराबाधंपीडारहितमेवतेशरीरंनाविष्यति।वत्सेपरिणतोदिवसः।एहि
उटजमेवगच्छामः।पस्मिन्नालोटजोत्विपामितसमरः।हृदयश्रयममेवमुखापनतेमनोरथेकातरनावतंयुवासि।एवका
रोनिवर्त्तक्रमः।नेवमुवसीति।मनोरथेइतिविषयस्यानिर्गीर्णत्वादतिशयोक्तिः।मानुशयविद्धाटितस्यसपक्षात्तापंव
तादिव्वाटितंवतस्य।अथानुशयोदीर्घद्वेषानुतापयोरित्यमरः।कथंतेसंजातसंतापः।यत्संगमेकातरतात्तसंगमानां
वितदनावएवोवितोनउतापइतिकथंशद्धार्थः।लतावलयलतानांवलयपतागृहंतस्मिन्मनोहरत्वादिक्षानितां।अ
मंत्रयेत्वांनृयोपिपरिनोमायसुखायसंभोगायवा।अनेनमनोरथंनामनृपमणमुपक्षिप्तं।तल्लक्षणंमु।मनोरथस्त्व ७५
व्याजेनविवक्षितानिवेदनामिति।मुकुरीति।मुहुर्वारंवारंअंगुल्यातर्जन्यासंवृतश्चासौहादेतः।अधरोष्ठोयस्याःतत्।प्रतिषे

धान्नराणि मा मालामित्येवमादीनि तेषां पदैकत्वं स्फुटमुद्धारणं तेनाभिरामं विलक्षवशाद्दोषधर्मपरः अस्य विवर्त्ति
तं शीलं यस्य तत्तिर्यक्कवलितं । पक्ष्मले अक्षिणी यस्याः सा पक्ष्मलाक्षी तस्या मुखं । अनेन चुंबनार्थमुन्नमनेयोग्यता
ध्वनिता । कथमपि महता कष्टेनोन्नामितं चुंबनार्थमूर्द्धीकृतं न तु चुंबितं दुःपश्चात्तापे । तेन तावन्मात्रं चुंबनलाभेना
पि कृतकृत्यता स्यादिति ध्वन्यते । स्वभावोक्तिः वृत्तिश्छेकानुप्रासो कथमपीत्यस्यार्थे प्रतिक्षेपणत्रयार्थस्य हेतु
त्वोपादानात्काव्यलिंगं च वृत्तमनंतरोक्तं । तस्या इति । तस्याः पुर उद्वपरिवर्त्तमानायाः पुष्पमपीनपल्लवमयी तेषां त
तापि स्पृष्ट्वा तेन तस्याः कोमलतरत्वं ध्वनितं तेभागीरणासंतप्तदेहेन लुलिता इतस्ततः क्षिप्ता । शरीरस्यासंतप्तत्वं प्रकार
ान्तरेण नास्तीति नोक्तं शिलायामियं शाय्यतीति यथा दृष्टोक्तिः । उक्ता । एवमेष इदामिच्छत्रापि अत्रैव पक्षः समीपतरवं
रदं नमदनानलं वस्यस्वो द्दे शो न प्रियपाली खितते न च हृद्यतरवंध न्यते अत एव नेदमेतदोः उक्तमनंगः श्लोकनीय
उक्तं वा इदमः अन्यत्र गतं समीप वेतर वर्त्ति वैतदो रूपमिति । अत एव तत्र पुष्पाद्यविक्षेपेणोक्तं । अत्र अनुनालिनी
पत्रैर्मालैरार्प्पित इति यथा पथ्यं पंचानामप्युपयोगादन्तर चाउल्याद्दानः स्वैरिति बहुवचनं । विसानराणा क्लांता मि

शा॰टी
७० तेवाइन्यमुनाअकारेण॥ अयं स्तनन्यस्तो मृणालहारः क्लांत इति अकारप्रश्लेषार्थः॥ मघादीपकालेकारः॥ आसमेताम्र
जमानेसस्वयमेव संबध्यमाने र्ह्वीणायस्यसः भ्रूनादपि तयाविरहेतादपिवेतसगृहात्सहसाकस्मान्निर्गंतुं न शक्नो
मि॥ ततस्त्वत्कान्यमुपभोगाविज्ञान्य तांतं मनोरमं यंति॥ तत्र सा किमुवक्तव्येत्यनावना॥ अत्र वकारेण भावस्तव्याति न
वः॥ हेवनु श्वासो॥ निर्गमनकारणे भ्रून्यत्वेसातियत्तद्भावः सा विशेषोक्तिः॥ अथवतस्तत्रावस्यकारणस्याभावे
पिगमनाभावस्तत्कार्यमुक्तमिति विभावना॥ अत्र वकारेण भावसादिनि दमुखेनोक्तः साधकबाधकप्रमाणाभा
वात्संदेहसंकरः॥ शार्दूलविक्रीडितं वृत्तम्॥ अस्य तुर्यचरणेनु पुष्पनामागम्य पहितं तत्स्वरूपं दशरूपकेपुष्पेवा
क्यं विशेषवदिति॥ सायं तनइति॥ सायं तनेसायंकालीने सायंचिरेत्यादिना ल्युट् तुडागमश्च॥ सवनकर्मणि
यजनकर्मणि सवनं यजने स्नान इति विश्वः सम्यकु यवृत्ते नवादावेवाकुतामानवतीवदिंपरितः प्रयत्नाद् इतस्तता
इतस्ततो विक्षिप्ताः क्षाविकीर्णासि इति पाठः॥ कपिशाः पिंगटाः छायाः पेक्षायः चकुपाः नेककालं वृंतिगनागतं कु ७०
र्वंति॥ छायाह्यातपाभावे इत्यादिसत्वेमापंक्तिशुभ्रस्मतेति विश्वः॥ परिश्रेतापिशापिदशीति केतंत्वनुसृतिस्म्रन्य

नुप्रासाः ॥ उपमा वा । वसंततिलकं वृत्तम् ॥ अत्रापि भयानको रसः । उक्तं वानयं तु मंतुना घोरदर्शनश्रवणादिभिः । वे
तस्यतीव वीं वल्पतन्वायेमनीवमध्ययोरिति तइयस्यापि नावः । पिशिताशनच्छायवलोकनं विभावः । पवास्य मन
यशब्देन चासलक्षणो व्यभिचारी उद्दीपनाविभावानुभावादिकं स्वयमूह्यं ॥ अत्र प्रातिमुखसंधेर्नर्मनर्मद्युतिपर्युपासन
न्यंगानि नोक्तानि कानिचिल्लक्षणान्ययेनाप्युक्तानि तत्कथमिति न वाच्यं । भरतादिभिरेव तथोक्तेः । तत्रादिभरतः । कवि
भिः काव्यकुशलैः रसभावमपेक्ष्य तु । संध्यंगानि कदाचित्तु द्वित्रिहीनानि वा पुनः । व्युत्क्रमेणापि कार्याणीति । रस
र्णवसुधाकरेऽपि । केषांचिदेषामंगानां वैकल्यं केचिदूचिरे इत्यादिना ॥ ॥ इत्यर्थद्योतनिकायां तृतीयोऽङ्कः
॥ ॥ अथ चतुर्थाङ्कादिपंचमममध्ये यणोक्तं करोतीत्येतेन गर्भसंधिरुक्तः । तल्लक्षणं भरते । उद्भेदस्तस्य बीज
स्य प्राप्तिरेव वा पुनः । अन्वेषणं यत्र स गर्भ इति संज्ञित इति ॥ शर्वसंधुपरिक्षिप्ताप्राप्तिः । दुर्वाससः शापादप्राप्तिः । पु
नस्तस्य प्रसादनाभिज्ञानदर्शनेन पुनः प्राप्तिरिति । अत्राप्याप्त्याशापताकानुरोधादंगानि कल्प्यन्ते । अभूता
हरणं मार्गो रूपोदाहरणे क्रमः । संग्रहश्चानुमानं च तोटकाधिबले तथा । उद्वेगसंभ्रमाक्षेपा द्वादशेति । एषामि

गी·टी गानांव्याख्यानावसरे तत्र तत्र लक्षणं वक्ष्यामः ॥ तत्र पताका यथा ॥ अनित्यत्वाद्दत्र पताकानामास्तीति । उक्तं घनिकेन पता
कास्थानत्र वास्याप्त्वाप्तिसेन वहूति प्राह्याप्राशापानि यतत्वमुक्तं तेन ग्राक्षसाद्द्यालक्षणामेव लिख्यते ॥ तल्लक्षणं सुध
७१ करोत्प्राह्यसाह्रात्तमहार्थस्यासिद्दिसद्भावनावनेति । अत्र व्याप्तिउ वासिसः प्रसादनेन महार्थस्य प्रकृतत्वात् रूपस्य राज्ञः ।
शासिसद्भावनेति ज्ञेयं । कुसुमास्त्वयं नाट्ये लाविति । सव्यहस्तेनोत्तानेनारालेन दक्षिणेन पुरः पार्श्वादिस्थितेनो
वित्याप्लुतसंयुक्तेन हंसास्येन । वामहस्तेनोत्तानारालेन दक्षिणेन पुरः । पार्श्वादिस्थितेनावित्याप्लुतसंयुक्तेन
हंसास्येन । तल्लक्षणं यथा । तर्ज्जन्यादिकं गुली पुत्राव्याः प्रख्याः परापरा । दूरस्थो वामनाप्लुका धनुर्वक्रा तत्तर्जनी
गुष्ठाकुंचितायत्र तमरालं प्रचक्षते इति । लताद्व्रतान्निसंस्थानास्तर्जन्यंगुष्ठमध्यमाः । शेषपत्रोर्द्धविरले स हंसास्ये
भिधीयते । अवितालुतसंयुक्तं सुमोपचयादिषिति न तु हस्तादनेवे रस्तेय इति व्याख्यानितं । एवं नाय इति माध्ये । त
था च वामनः । अवतराव वामना । अवतरात्मकयोः शैलमन्यासो वाला तामिति । अत्रोच्यते । हस्तादानग्रहणेन
प्रतासिरादेयस्य लक्षत इति हृत्रिकारोणव्यारम्भातं । हस्तादान इति किं । वृन्दाशीवरे पुष्प प्रवयं करोतीति प्रपु ७१

दाहृतो ३ देवपदमंजरीकारेणव्याख्यातं । आरुह्य हस्तादानेपि आदेयस्य असामतन्नावात्तद्वत्सभावः एवमन्यापि
तासां वालिकालादादेयस्य असामतन्नावात्तद्वत्सभाव इति ज्ञेयं ॥ अपि च देयघापिगांधर्वेण विवाहविधिना निर्वृ
ते कल्याणाजातमंगला । कल्याणे मंगलेपि वर्त्तते विश्वः ॥ श कुंतला अनुरूपनरेंद्रगामिनीसंवृत्तेति निर्वृतं सु
खितं मेहृदयं । तथाप्येतावद्विंतनीयं । कथमिव । अघस राजर्षि रिष्टिं परिसमाप्य इहासि हिं --- षि निर्विसर्जिति
आत्मनो नगरं प्रविश्य पश्चात् शकुरेव्वी समाजसमागता मिलितः तोगदृत्तं । तंस्मरतिनवा । अनेन वक्ष्यमाणेन दुर्वा
ससःशापेन राज्ञो नायिका विस्मरणं प्राप्ता विशुद्धा मनुविश्वासयुक्ता नववानतादस्याः स्त्रीति विशेषणगु
णाविरोधिनो न वेत्ति । यत्रागुणान्न वेत्ती स्तुतेः । तेन तास्मिन्दृष्टे तेवं वना विस्मरणादिके न संभाव्यत इति भावः ।
तात इदानीमिमं वृत्तांतं श्रुत्वा न जाने किं प्रतिपत्स्यत इति । यथाहं पश्यामि अवदसीत्तानार्यः आज्ञानामी सर्व
ः यथा ज्ञाद्वे योग्यता यां । योग्यतया हं जानामि तस्मात् अनुमतेन वेदिति । यथा इति योग्यता वा इपापृदार्थानतिवृ
त्तिसाद्दृश्येषिति दंड नाथः ॥ कथामिवकः गुणवते कन्यका प्रतिपादनीयेति प्रथमो मुख्यः । सं न वेदिति । यथा इति यो

शा॰टी
७२

गयतावी [illegible] यदार्थानतिवृत्तिसाहस्येषितिदं उनाथः। कथमिव गुणवते कन्यका प्रतिपादनीयेति अयमेव मुख्यः सं
कल्पमानसंकर्म॰ तद्यदि दैवमेव संपादयति। नन्विदं नारणे। अत्र व्यासेन कृतार्थो गुरुजनः। सखि अवचितानि ब
लिकर्मशज्ञानार्मततर्याप्तानि कुसुमानि। ननु परमतान्तेपा। सख्याः शकुन्तलायाः सौ नागपदेवतार्चनीयानु
ज्पतातदेवकुसुमाव्वपलन्नणी। पलिखिप्रातिथीनामिवमिवेदितं। मावेत्ताः। ननु सत्बोघनेऽ टत्तसंनिहिता शकु
तला अत्र यथ पुनर्हृदयेनासंनिहिता। उच्यंतगततहृदयेतार्थः। नवनु अलमेतावद्भिः कुसुमैः॥ विचिंतयंतीति॥ यं
विचिंतयंती अनन्यमानसा तेमां उर्वाससमुपस्थितमागतंतपोघनंत्वयं विवेपंनवेत्सि। सतं त्वयं न स्मरिष्यति
वपरं उबोधितोऽपि जापितोऽपि न स्मरिष्यतीत्यपिशब्दार्थः। प्रकर्षेस्मत्तः शूर्वेकृतां कथां मिवासराजा कोऽह
शः प्रमत्तस्य वधानरहितः तेनाससमर्थदोषः परिहृतः। कीदृशीं वंशर्वेकृतामंगीकृतां। काव्यलिंगोपमाक्षेपवृ
तिक्रत्यनुप्रासाः। नयतीयतिमातमातोतिसनासिनितिषेशतिच्छेकानुप्रासः। वंशस्थं वृत्तं। हा धिक् अप्रियमे
वसंवृत्तं। कस्मिंश्चिदपिशज्ञाहः परादाम्नन्यहृदया। नखलु पास्पिता कास्मिन्नपि एष उर्वासाः सुलभकोपो महर्षिः। ७२

तयाश्लिष्टावेगवलोत्फुल्लया उर्वीरयागतयाश्वतिनिवृत्तः। कोन्योकुतवहाद्दग्धं अश्मविध्यतीह ष्टातालंकारस्
गच्छपादेषु वृणस्यनिवर्तयेनपादेष्विति द्वितीयार्थे सप्तमी। यावदहमर्वाग्दिकमुपकल्पयामि। तच्छ्रेतितितिक्षं
तो। अश्वो हतिदुःखो। अश्वोपूर्ववनादुःखसंनाषष्ठो त्यादिसूत्रेणनिपातः। आवेगस्खलितयासंभ्रमस्खलिते
यागन्या अत्रष्टममाग्रहस्तात्मुच्यमानाजनं। अनेनापशकुनेन वीसस्तो निवृत्तिः सूचिता। अत्राग्रे वामो हस्तो
तिसमानाधिकरणविशेषणसमासे अवयवावयविसंबंधेन लक्षणा ... क्तं ववामनेन। हस्ताग्राग्रहस्तादि
यो गुणगुणिनोर्भेदाभेदाभ्यामिति। अत्ते तु अग्रहस्त इत्यस्य उपवायंशब्दो हस्ताग्रवाचक इत्याहुः। अपरे हस्त
स्याग्रमित्येव॥ विग्रहस्याग्रशब्दस्याहिताग्न्यादिषु पाठात् पूर्वनिपातमाहुः। इतरे त्वाकृते पूर्वनिपातानिपातनिय
मामावात हस्ताग्रशब्दमेवाहुः। कुष्ठो व्ययंरूपपतीति शर्ववन्नः। सखिअवक्रा इति वक्रः सकस्यानुनयं प्रतिगच्छा
ति। किं विमुनः सानुक्रोशाः सकृपः हतः। कृपादयानुकंपास्यादनुक्रोशोपीत्यमरः। तस्मिन्विद्धेकृतदपि। कथय
-पदानि वर्ति तु नेच्छतीति तदा विज्ञापितो मया। अथ मर्त्येति शेषः अविचार्य अत्र कोपः कर्तुं उचितो न वेति अविचार्य तु

शा०टी

७३

र्थः।। अविज्ञाततपःप्रभावस्य दुहितृजनस्यत्रभवता एकोपराधो मर्षितव्य इति।। अपमर्षो यथा सा का एव दुहितातत

द्दत्तव दुहिता।। अथ व दुहिता बालिका अतएवाविज्ञाततपःप्रभावा अत्रतोस्याः प्रथम एकोपराध इति सोढव्यः।। तत्तो

मेवचनमन्यथा नविर्तुं नार्हति।। किंत्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यत इति मेत्रपन्नकथयन स्वयमंत

र्हितः।। शक्यमिदानीमाश्वसितुं।। अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयांकितमंगुलीयकं स्मरणीयमि

ति स्वयं परिधापितमस्तीत्यर्थः।। तस्मिन् स्वाधीनोपायाशकुंतला भविष्यति।। देवकार्यं तावन्निवर्तयावः।। विलोक्य

ति। नाकुंतलामिति शेषः।। अनुसूये पश्य तावद्वामहस्तोपहितवदना अत्र वामहस्तेति व्रीला मा आत।। आलिखि

तेवेन्नु मेत्रज्ञा अतिनिश्चलत्वं साद्रूप्यं गमयं प्रियसखी शकुंतला भर्तृगतया चिंतया आत्मानमपि नैषा विभाव

यति जानाति काहं किं करोमि कुत्र तिष्ठामीत्याद्यात्मविषयकमपि ज्ञानं नास्तीत्यर्थः।। किं पुनरागंतुकं विभावय

तीत्यनुषज्यते।। तत्तज्ज्ञानं दूरापास्तमित्यर्थः।। द्वयोर्नेनुन्यनुमतो।। आवयोर्मुखे एव वृत्तांतास्तिष्ठतु आस्थितेः प्रामका

लतेत्यर्थः।। किंतु नरागंतुकं विभावयरक्षितव्या खलु प्रकृतिपेलवा प्रियसखी।। एवं वाक्यार्थे प्रमाणो हेतुः।। कोना ७३

मोस्रोदकेन नवमालिकां सिंचति वैधर्म्या॥ दृष्टांतः॥ द्वयोरित्यादिना॥ एतद् तेन ग्राकुंतलां प्रति विशाखा कथनं छुय
नाअभूताहरणमंगमुपन्निति॥ तल्लक्षणं तु कपटाश्रयं पद्वाक्यमभूताहरणं विदुरिति॥ विष्कंभलक्षणं श्वमेवोक्तं
अयमपि शुद्धविष्कंभः॥ केवलं प्राकृतेनैव कृतत्वाद्वा चावेलोपलक्षणार्थं समयज्ञानार्थं वेलाकाले वज्रलब्धेत्ती
रनीरयोरिति विष्कंभः॥ हंत विस्मये॥ यातीति॥ एकतः पश्चिमतः अरुणः संध्यारागः पुरःसरोऽग्रे यस्य सः अरुणः
वाकृतरागस्या अंधकारागे कीसारथया विश्वः ओषधीनां पतिश्चंद्रः॥ अतिदुःसहं हमरणादि विपत्तिस हत्वा विनाशकी
ओषधयस्तासां पतिरप्यस्तशिखरं यातीति॥ मम मर्यमपि घातयितुमेतत्ताद्व्यपदेशः॥ शिखरपदेनास्तु द्वेः एतेना
येति सूचितं॥ अरुणेन कृतः पुरःसरो यस्य स तथा हरिः अर्कः॥ एकतः श्वेतः आविष्कृतः प्रकटीभूतः तेजोद्वयस्य दृशोः
पस्य युगपदेकदा एकसमये नयदर्शनेनैव नियमः कर्तृनुनाकात्तेन तु क्रमिकदर्शने न तियुगपदित्युक्तिः व्यसनो
दयाभ्यामस्तमयोदयाभ्यां च हेतुभ्यां व्यसनं संपादितं तत्र हत्तमरः उदयः संपदुत्तत्वोः श्वेतस्य लोकः समुन्नता वितत्य ज
यः॥ लोक आत्मदशांतरेषु अतरयत दोष विशेषवादी नियम्यत इवेत्युत्प्रेक्षा॥ स्वस्व विपत्तिसंपत्तिदशायां केनापि

शा॰टी दुःखहर्षौ न कार्यौ विवेकिना वः ॥ अत्र च पूर्वार्द्धे यः कश्चिदतिसम्बन्धस्तोपि नाशं यातिअन्योयं केवलं नाम समर्थ सर्वं हास्या
श्रितं उदयं प्राप्य एव अस्तमुदयं गच्छतीति स तु रूपकद्वयव्यवहारसमारोपात्समासोक्तिः ॥ उत्तरार्द्धे च नियम्यत इति
७५ तस्य समर्थविवरणो प्रयोगास्संभवद्वस्तुसंबंधा मर्थ्यादिबिंबप्रतिबिंबकल्पनरूपा निदर्शना ॥ यंगच्छ वेत्तायावाप
वाते ॥ वाच्या निदर्शना यथा ॥ द्रुतं मणिपरखवेयादेवं रविमागतं सततां कार्पातिथेयीति बोधयन्नृगृहमेधितं इति
छेत्र अभ्यागतं वर्मणे एवकृतौ उपयेपि अकारिणि कृतादरणा उरः सरस्य समान तयोर्तुल्ययोगितापि अत एव
विशेषणे अक्रमे भंगो न शंकनीयः ॥ द्वर्करूपतेजो द्वयस्य वासनोदयात्यामिति यथासंख्यमपि ॥ देतुवृत्तसनुप्रा
सोवा ॥ कतो कतो रति द्वयघ तिच्छेकानुप्रासोपि ॥ वसंततिलकं वृत्तं ॥ देरूप अतितिनिर्देश्ययोरेकपदोपादानं नि
यमे सत्यपिश्चैषविपतर्कोहृद्येहृदयप्रतिलेपि सर्वनाम वक्तेयो द्वयस्येपि ति निर्देशेन तत्र तयोरापि तेजो रूप
वस्फुरणे अनुगस्थितिविकारकस्य तेजो द्वयस्येदृशी गतिरन्यस्य किमु वक्तव्यमित्यर्थस्फुरणाद्वस्तुद्वयपा
नामर्थपोषेन व मतकारमेवावहतीति तादृशस्थले न तद्दोषावकाश इति हृदयं ॥ ॥ अंतरितेति ॥ शशिनि १४

वंदेश्वंतर्हिते यतः सखाख्या पुक्तः कलं कीश्च अतस्तस्यां तद्धीनमुचितामिति भावः । या शर्वरी विकासितकुसुमा कमलोपहासकारिणी
सेवत तत्रापि याकातनननवतिश्चपि तु दृष्टियी वीहर्षकारिणी कैरविणी मे ममतापमस्याः विषयादिविवेकमन्यस्य दृष्टिं न नंद
यति न हर्षयति । तत्रार्थो हेतुः । कीदृक् संस्मरणीयानतु हूरपरोक्षो नायस्याः सा । अबलाजनस्येति सुखं हन्ते हेतुर्वेनोक्तो । अन्य
यस्त्रीजनस्ये सेवूयान् राजनम्रान्नजातिमात्रग्रहणं । नूनं निश्चितमतिमात्रमत्सर्थो । दुःसहानि अन्तिमात्रसुशब्दो दुःसहत्वस्य
प्रकाश्यानुष्ठाने बोधयतः । अत्र शर्वर्या इन्नाप केश्रंतर्हिते नायिका दृष्टिं न नंदयतीति नायकयोर्व्यवहारसमारोपात्समासो
क्तिः । उत्तरार्द्धे सामान्येन विशेषस्य समर्थनादर्थान्तरन्यासः ॥ छिष्टेति जानेजनेति मातिमाश्चेति छेकवृत्तिश्चाच्यनुप्रासका
व्यलिंगानि । वृत्तमनंतरोक्तं । अथ च कोपि पथिवांसु दृतीहर्षयुक्तासेव शर्वर्वे दृष्टायां ग्रामकुतला साक्षीनीति दुष्यंते विषयानि
गरणापत्रं द्वंद्वो दृवत्वादंतःतर्हिते संनिहिते इत्यादिशर्वर्यादं सर्वं योज्यं । तेनास्याराजगृहं शतिवस्यापकसूवकंदूती
यं यता कास्थात कमुपक्षिप्तं । तत्लक्षणामुक्तं मातृगुप्ताचार्यैः । अर्थापत्तेपणं यत्नुगूढं सविनयं नवेतरक्लिष्टग्रस्तुतेरोपतंतद्
तीयं तत्मतं यथेति दिशोक्तार्थान्तरन्यासश्च वर्णानंतरं प्रबुद्धदुःखवायाश्चनसूयायाः पटान्नेपेण प्रवेशः । नाम्रावितस्य

शा०टी पात्रस्यप्रवेशोनिर्गमोपिवेद्युक्तेः यद्यपिएवमपिनामविषयपराङ्मुखस्यापिजनस्यएतन्नाविदितमापिविदितमिवेति
येऽसाऽपरवधारणार्थंवा।।तथापितेनराज्ञाशकुंतलायामनार्यमाचरितमाहोतुक्तेः यद्यपिएवमपिनामविष
७५ यपराङ्मुखस्यापिजनस्यएतन्नविदितमपिविदितमकलानिवेदनार्थंगतेशिष्येः स्यात्तत्रसमार्जनादिकर्तुंआ
र्थाया।तएवप्रबोधकालइतिवदति।।प्रातिबुद्धाग्लपितापिकिंकरिष्यो।नमेउवितेयद्यपिनिजकार्येष्वुहस्तपादंप्रस
रति।कामरद्रांनामकामोनवतुः।अयमर्थः।समवेदावक्रः।अनार्यश्चेवप्रवर्त्तयतीतिसा।निलायोनवतुतस्यामिला
षः ऊर्ध्वतामिति।येनकामेनासत्यसंधेअसत्यप्रतिज्ञेसंधाप्रतिज्ञासम्यग्देहस्मरः जनेशून्यहृदयासखीपदंस्थाने
कारिता।शून्यहृदयंहेतुर्वेनोपात्ते।।अथवादुर्वासःकोपएषविकारयति।अन्यथाकरोति।।वैर्नाग्राहमीन्यथात्वपरि
णामेषिवितिमणेपागता।अन्यथाकथंसराजर्षिरितिसाभिप्रायंताहश्यानिमेत्रायितात्रक्ताएतावत्कालस्पलेखमा
त्रमपिनविसृजति।तादृक्तोभिज्ञानमंगुलीयकंतस्यविसृजावः।उःखशीलेतपस्विजनेकःअन्यस्पृश्यते।तत्रगंतुमि ७५
तिशेषः।ननुसर्वीगामीदोषइतिव्यवासिता।पिजनत्यवसायापिनपारयामिप्रवासप्रतिनिवृत्तस्यतातकश्यपस्य

दुष्मंतपरिणीतामापन्नसत्वांगुर्विणीं आपन्नसत्वा स्यादन्तर्वत्नी च गर्भिणी त्यमरः शकुंतलां निवेदयितुं सखीगा
मी दोष इति निवेदयितुं न पारयामीति संबंधः अनेन दैववाणया अस्या अन्तर्वत्नीत्वं श्रावयिष्यत इति सूचितं। अंके
गतेऽस्माभिः किं करणीयं। मा बिभ्यर स्वस्थाः शकुंतलायाः श्वस्थाने कौतुकं पारं पार्यागतमंगलं निर्वर्तयितुं संपाद
यितुं। कौतुकेन मणीछाया मुद्रावेकुत्र केउमुदि। पारं पर्यागतत्वात मंगलो द्वा हस्तसूत्रयारि रिति हेमः। कथमेतत्
वाकयार्थापमा।मनुमन्यतिमुनिमान्यतिस्मुस्मिये इति छेकानुवृत्यनुप्रासोवा।द्वितीयाउपजातिरिंद्रवज्रोपेंद्रवज्र
योः।अत्यएजनकं विश्वासजनकं प्रतिवचनमुत्तरं मध्यमपदलोपीसमासः।इदमेवस्पष्यांतरंगलेताद्दृशेष्वनुरा
गेकिं वास्मे तेनात्मात्मा इदानीमेव शोभनीय इति व्यवसितमेतत।आर्यपुत्र इत्यर्थाके संशयितेदानीनेषसमु
दाचारा।मोवेतिराजवंशोउत्पन्नोराजेतिप्रत्युतवचनवातुरीहन्यते शुक्लं नामेति कुत्सापांनामप्रकाश्यपुंसे
भाववाक्योपगमकुत्सनं इत्यमरः।तथा चातुरी आश्रमपदे स्वनाचोनानहृदपामित्यनेनात्म [illegible] तिमुग्धतले
नवपरदेवनानामिति तत्त्वं परात्म जननाविवेकस्यान्यत्वं बध्नातिनिमित्ताइमें जनंसमयपूर्वसंकेतपूर्वगांधर्वेणाविवाहेनेत्य

शा.टी र्थः।गांधर्वसमयान्मिथइतिस्मरणात्।अथवसमयश्शर्वेशापपर्यश्शर्वेनशापपर्यंकृतवानसीत्यर्थः।अथवसमयश्शर्वं
कालानियमश्शर्वात्रिचतुरादिनमध्येपंचषदिनमध्येवामनुष्यः त्रेष्यतइतिप्रकारेण।अतएवचवक्ष्यति।एकैकम
१०० न्यदिवसेदिवसेम।दीर्घनामाक्षरंगणयगच्छतियावदंते।तावारार्धिपेमदवरोधश्शहस्वेहोनेताजनस्तवस
मीपमुपैष्यतीति।अथवसमंश्शर्वज्ञानश्शर्वप्रनार्थ·समयाः शापपर्यवारकालास्सिद्धांतसंविदइत्यमरः।ईदृशोर
तिक्रूरेहृदयविदारकैर‒‒रैःअत्याख्यातुंनयुक्तामितिसंबंधः।इदमत्याख्यानंवाऽप्यात्रेणैवनतत्तत्स्वयेपरि
ग्रहस्यवक्ष्यमाणत्वादितिरतेरनुसंधानापकवेरस्मेरिक्तुविहिः।व्यपदेशामिति।व्यपदीश्यतेऽनेनेतिव्यपदे
शः।कूलंतटंविलापयितुंमलिनीकर्तुंदमंजनंमत्स्वकाणंपातयितुंवपतितंकर्तुंकिमीहसेवेष्टसे।त्वंतुइहागम
नेनैवपतितासीति।एणिवाद्यन्यते।कूलंकषातटसंघर्षिणी।सिंधुर्नदीप्रसन्नमंभःपयःकलुषयपतितटतरुं
चपातयपातितद्वादिसुपमा।अत्राभिन्नेऽत्रपिगुणक्रिये·अतिशयोक्त्यानेदनाद्ध्यवासिते।अत्रोपमेयप्रकृतमंतर्व
र्त्तीवंविशेषणसमस्येवेतुपमानेकूलंकषेतिविशेषणे।शूर्वोद्वौगुणक्रियपयोःसमुच्चयः।व्यस्ततोपितस्यालंकारस्य १००

ष्ट्वा नास्रज उत्तर इत्याद्येतदं तेन परस्परदोषप्रख्यापनादपवादो नामांगमुपक्षिप्तं। तल्लक्षणं तु। दोषप्रख्यापनं य
स्यादपवादः स सम्मत इति। नवं तु सूर्पतामनेन दोषप्रख्यापनेनेत्यर्थः। यदि परमार्थतः परपरिग्रहशंकिना
त्वया एवं वक्तुं प्रवृत्तं। तात तावद्धि अभिज्ञानेन मुद्रिकारूपाविकेनानेन तवाशंकामपनेष्यामि। उदारः कल्पः। मुख्यो
न्यायः। कल्पः स्यात्प्रथमो न्याय इति विश्वः। महान् विश्वासो वा। हा धिक्। अंगुलीयकशून्या मेंगुलिः। नूनं ते श
क्रावताराभ्यंतरे शचीतीर्थसलिलं वंदमानायाः प्रभ्रष्टमंगुलीयकं। प्रत्युत्पन्नमति स्त्रैणं स्त्रीसमूह इति यत्क्रि
गतिश्चासि इदं तदिदं प्रत्यादिश्यमानं। ताकालिकं तु प्रतिभा प्रत्युत्पन्नमतिः स्मृतेति प्रत्युत्पन्नलक्षणं स्त्रियाः करे।
अत्रत्रता विद्धि विनादाशीतिं श्रुतं वां। अपरं ते कथयिष्यामि स्नातव्यमिदानीं संवृत्तमिति। नवतीभिः कल्यान
सह त्वं विधायालीकवचनोपन्यासः कर्तव्यः स्ववेन्मयानश्नोतव्यो ममाश्रवणापराध एव स्यादिति प्रयोज
नानावपि श्रवणमात्रे विधिरिति संवृत्तपदघोतं। नन्वेकस्मिन्दिवसे नवमालिकामंडपे नलिनीपत्र
भाजनगतं उदकं तव हस्ते संनिहितमासीत्। तत्क्षणे स मेदुरकृतको दीर्घापांगो नाम मृगपोतक उपस्थि

शा०टी तः।त्वयाद्य यं तावदद्यथमं पि बालिन्यनुकंपिना उपच्छंदितोभ्यर्थितः उदकेनानभुनस्तेऽपरिवयाद्धस्तात्पाशमुप
१०१ गतः।पश्चात्तस्मिन्नेव मया गृहीतेसाहितेकृतः खेणोपः प्रीतिः।तदावामिह कुरु प्रहसितेतासि।सर्वा सगंधे भुसत्वयूथे भुवि
श्वासिति।द्वावप्यत्रारण्यकाविति।आत्मकार्यस्य निवर्तिनीनां संपादिकामं।ललनानां विशेषणाद्देव विशे
षयन्नाति पत्रैः।अत्रान्तृतमस्ववाप्यश्रुभिरिति एकदेशविवर्तिरूपकम्।तेन तासां ललनानां।विषयिणां कामुका
नीमत्र मरतेरूप्यत इति त्रैयं महालागनाहस्योवं मंत्रपितुर्वकं।तपोवनसंवर्द्धितोनभिज्ञोयं जनः केतवस्या
त्रीणामभिविशेषाणां मध्ये मानुषी भुमानवव्यतिरिक्तासुवेवकवागादिव्यवहाररहितास्वपीति भावः।ता
स्वपि आशीर्ति तपेतुतासु अनुपदिष्टकौशलमर्थाद्वेवनेतम्यकूद्दश्यतेतेनैतित्यं त्रागिता नानिरासः।पाः प्रति
बोधवन्यः धामादिव्यवहारकुशलास्ताः किमुवक्तव्याः।तासामनुपदिष्टं वेवकस्य कौशलं किमुवक्तव्यमि
त्यर्थः।खेलु सर्थः परभृता इति साभिप्रायं।कोकिलाः अंतरिक्षगमनागमनादाकाशगमनाउड्डयनाम्र
कत्वमपत्यजातं अन्यैर्द्विजैः पक्षिभिः ध्वांक्षैः काकैः परितः सर्वप्रकारेण पोषयंति।अत्र चेशक्रेतलालज्ञो १०१

विशेषेप्रसक्तेतथ्वीसामोन्यस्योन्नलादप्रसक्ततत्रासंग्रासाकिमुच्यतेनव्यतिरेकः। अथंतिरन्यासोपि। छेकवृत्तिरनु
प्रासाः। अनेनहेत्ववधारणनामकंसंध्यंतारोगमुपन्निस्तं। तल्लक्षणंसुधाकरे। द्विनिश्चयोहेतुनार्थस्यमतेहेत्ववधा
रणमिति। अत्रपरन्नतादिदृष्टांतेनस्त्रीवेहेतुनाम्हषामाषएणलक्षणास्यार्थस्यनिश्चयाद्धेत्ववधारणं। आत्मनोहृद
यानुमानेनपश्यसि। जानासियथाहृदयंवेवनापरंतयान्यहृदयान्यपिजानासीत्यर्थः। कइदानीमन्यः स्वमेके
त्रुकप्रवेशिनलक्षणाद्धिन्नकोपोपमस्यतवानुक्तातिंद्यातिपद्यतेकोन्यइतिसंबंधः। मयीति। अतिरुषाध्यविक
कोपयाऽतिकोपेनवाऽअतएवातिलोहिताक्षाऽअतसारन्तनयनयाविगतंतामरसंपस्यतरक्षतएवदारुण
यद्वितंतेमवृत्तिर्वर्तनंपस्यतास्मिन्नतएवरहः। एकांतेवृत्तंसंपन्नंप्रणपंसेऽअनुप्रतिपद्यमाने। जानानेमयैवे
तेवकारेणकोपस्यतालिकत्वंद्योतितं। कुटिलयोर्नुवोर्भेदात नूनंगातस्यरस्यनारासनं कंदर्पस्यधनुर्मे
घ्रामिवेमुखेन्ना। अनयावतथास्याः कोपोयथापायन्नातेरथनुनीयमानाकोपंनमुंवेन्नातावत्कामस्यश
रासनभंगनेवव्यर्थत्वमेतदनुनयाभावेइतितालिकः कोप इतिवस्तव्यन्यते। अनेनवव्यापिन्यारतेरनु

संधाने। कामलिंगं। रणरणेति वृत्तौ वृत्तमिति यत्र प्रेतिरासरस्येति छेकानुप्रासः वृत्त्यनुप्रासश्चात्र द्वयोर्व
संततिलकं त्रुकुंतलासरोषमित्यादि· एतद्दंतेन संकेटनामांगमुपन्यस्तं। तल्लक्षणं तु। रोषग्राथितवाक्यंतु।
संफेटघ्नारिकीर्तितः। इदं वैवक्कतामुपेता वदंत्रत्वच्छेदवारिणीकृताम्मिया। हमत्यदुरुवंशे प्रतसयो विश्वा
सत्तेन। सुलभमवोरुहृदयास्थितविषस्य तत्रसतेयो तपिंतुस्थितपदं॥ विमुस्येतानेनकापद्यस्यानिगरणाम्
रत्यतिशयोक्तिः। हस्तान्यानांकरसमीपमुपगतानां विशेषण द्वये नातिखलत्वमावलंघ्यानितं। आत्मकृतेवा
पलं। कदाचिदैवानुकूल्येन सम्यक्कयापरिणाममति। प्रतिहतं केन विरुद्धं सहते। अतइति। अतः कारण
त्संगतमेव परोक्ष्यकार्य रहाएकांते संगतं विशेषात्परीक्ष्य कर्तव्यमित्यनुषज्यते। अत्र न्यक्कुंतला दुष्यंतयोः सं
गतस्य कर्तव्यो विशेषप्रत्युक्तेप सामान्य संगतमात्रस्य प्रत्युक्तस्येव वचनेसाप्रस्तुत प्रशंसा। अन्हीत हृदयेषु
व्यवहारादिनाऽज्ञाता विशेषसौहृदमैत्री वैरी भवति। अयं वै धर्म्यार्गाणां यांतरन्यासः। अत्र भवती प्रत्ययाद्व
न्या विश्वासात्भवद्धियादृयं शुल्का एतद्ध्वनविश्वासादितर्थः। एवकारेण युल्लंपतरानिरासः। अस्मानि

तिकुरुवंशोत्पन्नानां सर्वदा धर्मनिष्ठानां इंद्रादिभिरणुपचारेण गृहीतानि तादृग्धर्मशतं वचनकौशलं सम्यक्कृत
लाघघुतः संस्कृतं नुस्पष्टः दोषापेतानि अक्षराणि ये अवचनेषु तैर्वचनैरिति विशेषमुन्नेयं॥ त्रिगुणय
हिंस्या अधरं हीनं वचनं उत्तरं च अधरोत्तरं च दोषाज्ज्ञानादिति भावः॥ अधरयोरोष्ठयोः उत्तरं एतदोष्ठयोरेता
दृशं वचनं कथं निर्गतं ओष्ठौ न विदीर्णौ इति भावः॥ अधरस्य हीनस्य वा उत्तरं॥ अधरमधरत्वात् स्वयमामिर
मुत्तरं ऊहं तु किं वदिष्यतीति न ज्ञायत इति भावः॥ अधरो दंतवसनेन हीनेऽधरोन्यवदिति विश्वः॥ अधर
मधरत्वात् स्वयमामिस्मुत्तरं ऊहं तु किं वदिष्यतीति न ज्ञायत इति भावः॥ आजन्मन इति॥ यो जनस्त्वा जन्मनः॥
शाल्यधौर्मस्त्वा शिक्षितः स्वेनान्येन वेत्यर्थः॥ तस्य जनस्य वचनमप्रमाणं ये जनैः परातिसंघानं परवंचनं वि
धीति विद्याकूपहेन यथाविद्या सद्गुरोः सकाशात् प्रदाया शुद्दिने मंगलपूर्वकं अध्ययनध्याय निवृत्तिपूर्वकानि य
तात्माभिस्त्वद्वादियमप्यधीयते न तु शिक्षितेत्याप्तभावः किलेति संभावनायां॥ किलशब्दः तत्क्वार्तायां संभा
वानुनयार्थयोरिति विश्वः॥ अत्र शंकते तत्वा वचनं सत्यं अर्थतवचनमसत्यमिति विशेषग्रहः ते सामान्यवच

नेस्तावैधर्म्येणाप्रस्तुतप्रशंसा॥ अथवाऽप्रमाणं॥ अपि तु ननेस्राक्षवा वः॥ अपि तु नेति का कौ साधर्म्येणैवाप्रस्तु
तप्रशंसा॥ रूपकानुप्रासौ च॥ वृत्तमुपजातिः॥ शकुंतलासुस्तुदावेतेतदंतेन रवो नामं गम्सुपक्षिप्तं॥ तस्माद्ग्रणं तु

॥ गुरुव्यतिक्रमो यस्मात् विहेयो ऽयमुवस्तुमसरिति॥ सत्यवादिन्निति सोऽस्तु॥ अप्रतिसंधाय पक्षेव पिता॥ राजा भोः स
त्यवादिन्नित्यादिना नात्र उद्धृतमितं तेनात्र मानामनाद्या लंकारो निबद्धः॥ तल्लक्षणं तु॥ अत्र मासा परिन
वः स्वल्पोऽपि न विषयते इति॥ तदित्युपसंहारे॥ एषा नवतः कीता एनां त्यज वा गृहाण वा॥ अर्थातिरन्यास्सम
हा॥ उपेति॥ सर्वतोमुखी सागेता ऽनेस्वीकारे दाने इत्यादि तेनत्वं पृथक्कुर्वीति भावः॥ कथमनेन कितवेन वि
प्रलब्धास्मि यूयमपि मां परित्यजत कथमिति संबंधः॥ वत्सयाङ्गरवः अनुगच्छतीति इयं खलु नो ऽस्मान् करुण
परिदेविनी शकुंतला प्रत्यादेशपरुषे प्रत्यादेशो निराकृतिरित्यमरः॥ भर्तारि किं वा मे प्रतिविकारकारो ऽपु
रोभागे दोषदर्शिनी॥ पदाति॥ त्विति पौरा राजा पश्चाद्वदतीति तथा यदि तमासि तदा ऽकुलया पश्चात्तिरिस्सम
रः॥ भर्तारि किं वा क्रांतकुलमपीदयात्वया पितुः किं प्रयोजनमित्यर्थः॥ वः इर्वतो व्यतिरेके॥ अथास्मनः स्तु

विपावित्र्यत्वं तं नियमं बध्नासि यदि तदा पातिव्रत्येन तव दास्यमपि नमं समीचीनं। हे वनुष्यासो। कृतविलंबितं हृन्ना। कुसु
दान्येवेति। नापराणी सुनयत्र एवकारार्थः। हि निश्चितं वाशिनां वृत्तिः। परस्यपरिग्रहः। अपत्नं वक्तृकलत्रं
वतस्यश्लेषत्तस्मात्सम्यगतिन्नायेन परा ~९ रवीनिवर्त्तनशीला परकलत्रं परास्सुखं तेनापि तत्संप
र्कपराङ्मुखत्वं तदपि तन्मात्र नापि तु सम्यगिति। तेन संश्लिष्टः परासुखविशेषणतया योज्यः। अत्र दुष्यं
तस्य च कुंतलाऽतंगीकारे विशेषप्रसक्ते सामान्यवचने ताप्रसक्तत्वं तस्य। पूर्वार्द्धे वैधर्म्येणमालादृष्टांतालं
कारः। अत्र पूर्वमुपमेयं पश्चात्प्रतिबिंबत्वेनोपमानं निबद्धवानिति नायं नियमः। दृष्टांतः पुनरेतेषां
सर्वेषां प्रतिबिंबनमिति तल्लक्षणात्। उदाहृतं वरुचकेन। अविलंघितएव वानरमनैः किंवस्यगामी
रतामापातालनिमग्नपीवरवपुर्जानाति मंथाचलः। देवीवाचमुपासते हि बहवः सारंतु सारस्वतं जा
नीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविरिति। अत्रवज्ञानाख्ये धर्मेणनोपम्यं किंतु बिंबभावेनै
वेति। कश्चित्त्वालंकारिकः पूर्वार्द्धे वैधर्म्येणमालाप्रसक्तत्वदोषमप्युत्तरार्द्धे तत्सामर्थ्यनरूपोर्थांतरन्यास

शा॰टी इत्यवदत्तत्त्वायततोपमश्रक्तो विशेषः सामान्यं बोधयेदिति वक्तव्यं। तत्राप्रक्ततस्य विशेषरूपत्वाद्देवाना
२०४ पितयोः कार्यकारणभावः। नाप्यत्र सारूप्यं। ताद्दशधर्माभावात्। कुमुदानि पंकजानीति नपुंसकलिंगोपा
दानाद्या तेन पूर्वोक्तमेव साधु। ननु तवापि मते कथं बिंबप्रतिबिंबभाव इति सर्वसमंजसं। छेकवृत्त्यनुप्रा
सो। एतदानि प्रायेण वशाङ्कः स्ववचनं पदान्विति अन्यस्यालौकिकस्यन्त्रापस्य संगः संबंधस्तस्मात्। अ
थवा नायस्यावह्नुमच्चादेवा। संगात्। अथवान्यस्यालोकोत्तरायाराज्ञलक्ष्म्याः संगादित्यादिर्योज्यं। वि
स्मृतं विघटते स्यो विस्मृतमर्शआदितादवृ विस्मरण पुनरुक्तं इत्यर्थः। अनेनोच्छ्वासनामानाद्यालंकार उप
क्षिप्तः। तल्लक्षणं तु उच्छ्वासनं स्यादहासोयोप्स्य क्षोसाधुमानिनीति। मूढ इति। आहो इतिपत्रांतरे। पांसुल
सुखले इति विश्वः। राजा नोः सत्यवादिन्नित्याद्येतदंते ना विरोधनामकमंगमुपक्षिप्तं। तल्लक्षणं तु उत्तरो
त्तरवाक्यं तु विरोध इति संज्ञित इति। अनुयास्ताशीतयत्तु। अशुद्धात्तमंतष्पुरं भगवति वसुधे देहि मे विवरं १०४
श्रवेद्यायेत्यर्थमापव्यवहितस्मृतिरिति काचिद्वचनमनुवादंतन्मूर्ता सा निंदतीति। पतोवाला। तय

वबाहन्नेपंयथास्यान्नयथास्यात्तथाक्रंदितुंप्रवृत्तेतिबालास्वभावोक्तिः॥इदंज्ञातमेवेतिराजाएकान्तिकिंवेति
॥त्रीसंस्थानेललानाकानं तेजोरूपत्वेनस्य स्पष्टमदृश्यमानं अतएवसंस्थानशब्दप्रयोगः॥दैवेननीतापिस्त्रीकौ
रेणैवातिपरशुरुषासंस्पर्शलिंद्धानीतं॥एकंकेवलंज्योतिरेनामाराहृत्यउज्जिगामस्त्रीतीर्थंयतीतीर्थंजगामे
तिसंबंधः॥क्रियपोःसमुच्चितत्वात्समुच्चयालंकारः॥हेवनुप्रासोवसालिनीवृत्तं॥नेपथ्येअन्याघेतदंतेनस्य
धिक्तिर्नामागमुपन्नित्वं॥तत्वन्नणंतुविरोधप्रशमोयक्तसाशंकितिरितिकीर्तितति॥अनेनाद्भुतरसोपिध्वनि
तः॥तत्रलक्षणंतुदुर्लभानामीष्टसंप्राप्तिःदिववराणांविलोकनं॥एतेयत्रविभावाःस्फुरनुभावास्तुनेत्रयोः॥वित्ता
रणंनिर्निमेषमीक्षणंपुलकोद्गमः॥गद्गदवचनंस्वेदवेपथुहर्षगोवराः॥स्पर्शग्रहादिकाश्चतुभावाःसंचारि
णोस्त्वमी॥तत्रस्वेदश्चारोमांचःचलयोगद्गदंवचः॥आवेगसंभ्रमौजाज्याममितियत्राधिविस्मयःस्थायीतिम
तंप्राहेति॥पर्याकुलत्वंशाणावसानस्यैकथा॥२॥इत इतोदेवः॥कामममिति॥काममतिशयेनश्रुत्यादि
भ्यंनिराकृतांमुनेस्तनयांपरिग्रहंप्रतिनस्मरामि॥तुपुनर्बलवदाविवेकंदूयमानंमेहृदयंअन्यायातीतिवि

र

शा.टी ॥ स्वासमुत्पादयतीवेत्युपेक्षा ॥ अनयास्थायिन्यारतेनरनुसंधानं ध्वनितं पीडयाः कारणस्य स्मरणस्याभावे
पिपीडेति विभावना ॥ अनुमानं वा तत्त्वन्यायनस्य साध्यत्वे हृदयपीडा हेतुत्वात् ॥ अनुमानं तदुक्तं यत्र साध्यसा
१०५ धनयोर्वच इति तत्त्वक्षणात् ॥ अनेन प्रसंगनामा भोगमुपक्षिप्तं प्रसंगश्चैव विज्ञेयो गुरूणां कीर्त्तनं हि यदिति ॥
अत्र मुनेर्लिनयोति गुरुकीर्त्तनं ॥ ॥ इति सिभिज्ञानशाकुंतलटीकायां पंचमोऽङ्कः ॥ ॥ ॥ नाग
रिको नगररक्षाधिकृतः श्यालो राजश्यालः कोट्टपाल इति यावत् ॥ अलेअरे कुंभीलआ कुंभीरक चौरा कुं
भीरको गंठुपदत्तालकरश्च मालिम्लुच इति नाममाला ॥ आबा नेप इति मागधभाषा वारुरुव सूत्रेण सिद्धा वाका
रादेशः ॥ कथय कुत्र अलयापण्शो घटितमणिबंधनो कीर्त्तिनामधेयं मणिबंधनं सुवर्णप्रच्छन्नीकरणं तच्चउ
त्कीर्ण्णन्यक्षीकृतं नामधेयं यत्र तथा ॥ लाअकेलए राजकीयं अंगुली अएमंगुलीयकेरः स्वार्थादिए समास
द्धितं मागधी राक्षसादेः स्यादिति भरतोक्तेः राजादिग्रहणेन शकारधीवरादीनामपि ग्रहणात् तेषां मागधयु १०५
क्तिः ॥ तत्र रसोर्लशाविति सूत्रेण रेफस्य लः दंतस्य तालव्यः ॥ अत एस्यादित्यनेन प्रथमैकवचनस्यैकारः

नसीदंतुमावामिश्राः।मान्योमा वस्तवक्तव्यः इ सुतोर्मो देतिसंबोधनं।असौनीवः सुतरां ग्रामीणा इतितेन
मिश्रपदं गौरवार्थमुक्तं हगेअहंः अहे वयमो हगे इतिसूत्रेण हमितस्य हगे आदेशः।न ईदृशः कमेकारी।
किंशोभननोब्राह्मण इति कलायिचारञ्जाराज्ञाप्रतिग्रहो दत्त इतिसोपहासं।माराध्यान्यत्।तेञ्जोज्ञ इ तेञ्ज्ञः
सुणवदाणिः श्रृणु तेदानीं।इहहवोहिस्येतिघः।इदानीमोदाणिमिति दाणिं आदेशः।अहं शक्रावता
रान्यंतरवासी धीवरः।शक्रावतार इति तीर्थनामः।तस्यवाड्रामनामापि।एतदेवपूर्वीकेशवीतीर्थशम
इनोक्तं।पाटच्चरचोरदस्युः पाटच्चरस्तेत इति हेमः।किमस्मान्निर्जाति ः पृष्टः।पूर्वकोतिराज्ञिणा रेकत
रस्यनामः कथय तु सर्वमनुक्रमेण।मा एनमंतरे मध्ये प्रातिबध्नीतं।पदा युतः अणावेदिष्यामहपयति
दिवि वेवारितिदिः।नागिनी पतिसावृत्त इ च्यमरः कथय।अस्र हकेअहं।अहमर्थे हगे इत्युक्तेः जालोद्गा
लादिभिर्मत्स्यबंधनोपायैः कुटुंबभरणं करोमि।जालंमुत्रकृतमानायः।उद्गालोबडिशं।उग्गालोबडिसं
मित्यत्र इति देशी कोशे।विशुद्ध इदानीमाजीवः।सहजंकिलयन्नविनिंदितं नखलुतत्कर्म विवर्जनीयं।धीव

शा॰टी रस्यां जीवे विशिष्टे वृत्तिस्ते सामान्यमुक्तामिति ग्रस्तातं ब्रह्मसाध्वनुकंपाकृपातया मृदुरेव श्रोत्रियः दारु
१०६ णं पशुमारणकर्म विवर्जयाति यथा तथा मम सहजं विवर्जनीयं न भवतीति वैधर्म्यदृष्टांतः॥ इदं स्वार्थे तद्दे
पमायथा श्रोत्रियश्च दक्षो वैदिकः दारुणं पशुमारणकर्मापि यज्ञादौ न विवर्जयति॥ क्रतुषु हिंसाया वि
हितत्वात्सहजं विनिंदितमिति नोद्धार्दितिः॥ एकस्मिन्दिवसे खंडशो रोहितमत्स्यः रोहित इति मत्स्यविशे
षस्तं तुम॥ मया कल्पितो कल्पितः कल्पनं कर्तनं कुशाविति विग्रहः॥ यावत्तस्योदराभ्यंतरे इदं रत्नभासुरमंगु
लीयं दृष्टा पश्चादहं तस्य विक्रयाय दर्शयन्गृहीतो भवामिश्रैः मारयत वा मुंचत वा विक्रयायेति चतुर्थ्या
:षष्ठीति नियमेन षष्ठी प्राप्ता तादर्थ्ये वं ३ वेति विकल्पेन चतुर्थ्येकवचनं॥ अयमस्यांगुलीयस्यागमः प्र
ष्टिः स्तद्वृत्तांतः॥ जानुकोतिद्वितीपगुरुघना मा विस्रगंधिः॥ विस्रस्यादाममंधियादित्यमरः॥ गोधादी गोधाश
नः मत्स्यवधो धीवर एव निश्चितं सयं॥ अंगुलीयकदर्शनमस्य विमर्शयितव्यं॥ राजकुलमेव गच्छामः॥ तहत
था॥ गच्छ अग्रतोगच्छेत्यर्थः॥ अरगं ३ भेदकावेरा॥ सूचक इमं गोपुरद्वारे॥ सूचक इमं गोपुरद्वारे॥ बहिर्द्विक्षु गोपु १०६

रामित्यमरः। तत्राश्रमस्तैर्भासावधानौ प्रतिपालयतं रक्षतं। तावदिदमंगुलीयकं यथागोमनं मन्तुरिति चतुर्थ्या ष
ष्ठीतेन भर्त्रे निवेद्य ततः शीघ्रं सन मार्गां प्रतीक्ष्य गृहीत्वा निष्क्रमामि। प्रविश्य तुझ आवुत्तः स्वामि प्रसादाय जानुक
निरापतेखलु आवुत्तः। नचवसहोसप्पिणीयारा जानः। फुल्लंति प्रस्फुरंति मम हस्ताग्रस्य च हास्तव धार्थसुम
नसः कुसुमानि पिनद्ध परिधापय —— ज्ञं। आमुक्तः प्रतिमुक्तश्चापिनद्धश्चापिनद्धतदित्यमरः। चतुर्थ्याः षष्ठीता
दर्थ्ये ३ इन्नाणुवर्तमाने चचातुर्थी स्थावितिसूत्रेण चतुर्थ्येकवचनस्य षष्ठ्येकवचनं। तेन च हस्ते सतिति सिद्धं। व
स्सवथासे ... पदापिकः पाठः। नार्हतिनावः। अकारणे मारणं मावयितुं प्रापयितुं। ततः प्रविशतीसाधे
तदंतेन विरलनामकमंगमुपन्निदेशं। तल्लक्षणांगो ३ वधबधादिको यस्तु वि ३ वः स प्रकीर्तितः इति। एष अस्माकं
स्वामीपत्रहस्तो राजशासनं प्रतीक्ष्य ३ तामुखं दृश्यते। गृध्रबालिर्भविष्यसि शुनोमुखं द्रक्ष्यसि वा। सूचकमुप
तामेष जालोपजीवी उपपन्नः खल्वंगुलीयकस्यागमः। यथा आवुत्तो भणति। एष पमसदन्तं प्रविश्य प्रतिनि
वृत्तः। अथ कीदृशो मे आजीवः। एष भर्त्रा अंगुलीयकमूल्यसंमितः प्रसादोपि दापितः। सोवनमपि यद्भः स

शा·टी मुद्रितेनागतोस्वं वनं तेनोत्क्षिप्तं वनेऽन्यमरणान्नर्तैरनुगृहीतोस्मि। एषनामानुग्रहः पतत्शूलाद्‌वतार्य हस्तिस्कंधे प्रति
२०७ ष्ठापितः। परितोषं कथयस्व। सम्भ्रमादिस्वादौ श्वेतेनांगुलीयकेन भर्तुः संमतेन भर्तुः संमतेन भवितव्यं। न तास्मिन्महार्हे
रत्नं भर्तुर्बहुमतामिति तर्कयामि। तस्य दर्शनेन भर्तुरभिमतो जनः स्मारितः। मुहूर्तं प्रकृतिगंभीरोपि पर्युत्सु
कनयनश्चासीत्। सेवितेनामस्त्यावुत्तेनात्वसेवादर्शितः तत्पर्थः। न नुभगाणास्यकृते मात्स्यिकभर्तुर्भिक्षयेन जीवति
मात्स्यिकाः। तेषां भर्तुरस्य उतमपस्य कृते सेधितो धनप्राप्तिस्तन्निष्ठतिसेवनमेतदर्थमेव जातमिति भावः। अ
तएवाह्न यया पश्यतीति। महारक इतः। अर्द्धं युष्माकं सुमनो मूल्यं भवतु। सुमनोमूल्यं पुष्पमूल्यमिति विनयो
क्तिः। एतावद्युज्यते प्रियवयस्यक इदानीं मे संवृत्तः। कादंबरी मदिरा सख्यं विविधमेकत्र पानेनास्माकं प्रथममेवो
मितं। अथयावत् पूर्वं न जातमिष्यते तत् शौंडिकापणमेव गच्छामः। प्रवेशक इति। प्रवेशकलक्षणं वसुधाक
रायत्रीवैः। केवलं नीचपात्रैर्भाविभूतार्थसेवनं अंकयोरुभयोर्मिध्ये सवित्तेन प्रवेशक इति। अंकयोरुभयोर्म २०१
ध्ये इत्यनेन प्रथमांकानिषेधः। केचित्तु प्रकटितापः प्रवेशक इति पाठः। तत्र विष्कम्भ द्वयं तृतीयवत्पुर्षयोरंक

येऽधः षष्ठे तृतीयः प्रवेशक इत्यर्थः ॥ निर्वर्त्तितं मम पर्यायपनिर्वर्त्तनीयं अप्सरस्तीर्थसांनिध्यं यावत्साधुजनस्या
भिषेककाल इति । पर्यायोऽवसरे क्रम इत्यमरः । तत्र गंगायामप्सरस्तीर्थं नाम तीर्थमस्ति तत्र यावत्साधुजनस्नान
कालं एकैकस्मिन् दिवसे एकैकया अप्सरसा संनिहितया स्थातव्यमिति नियमः । तस्मिन् दिने सानुमत्या तत्कार्यं त
त्कृतमित्यर्थः । सांप्रतमस्य राजर्षेरुदंतं वार्त्तां प्रत्यक्षीकरिष्यामि । मेनकासंबंधेन शरीरभूता मे शकुंतला तया
च दुहितृनिमित्तमादिष्टपूर्वास्मि । किंनु खलु ऋतूत्सवेपि निरुत्सवारंभमिव एतद्राजकुलं दृश्यते । अस्ति मे वि
भवः [illegible] प्रणिधानेन सर्वं परिज्ञातुं । किंतु सख्या मे मेनकाया आदरो मम यामानयितव्यः । भवतु अनयोरेवोद्या
नपालिकयोस्तिरस्करिणीप्रतिच्छन्ना पार्श्वे वर्त्तिनी भूत्वा उपलप्स्ये । नाट्येनेति । गंगाव
तरणावतरणं । तल्लक्षणं तु । पृष्ठेत्क्षेपनिक्षेपावधुनोत्क्षितसन्नौ । मजेताः त्रिपताकौ वेदेवमेव वा स्मृतः इति ॥
गंगावतरणमिति एवंविधं नाट्यमित्यर्थः । तदेतेन सानुमत्या आत्मनो विमानात् कृतं ताद्विवलनं नाम अंगमुपन्य
स्तं तल्लक्षणं दशरूपके । किंचिद्विवलनमिति ॥ ततः प्रविशती चेट्युद्यानपालिकयोरिति सूचिततदन्वयोः

था.टी श्वेशः॥ आताम्रहरितपांडुरजीवितसर्वंवसंतमासयोः॥ दृष्टोसिचूतकोरककृतुमंगललताप्रसादप्रामिश्च

प्रथमसंबोधने नत्वमावोक्तिः॥ सत्यमितिशपथे॥ सत्यं वशपथे तथ्ये इत्यविश्वः॥ वसंतमासयोर्जीवितेतिरूपकं

१०८ ॥ सस्त्वप्यानेशुश्रमूनेशुतदंकुरणेनकृतोसिच्छासितत्वामिवगम्यत इतिरूपणं॥ क्वाविज्ञीविदसर्वामितिपाठः॥ त

दा प्राकृतेशूर्वनिपातात्तियमासर्वेजीवितेति॥ अन्यत्र वसंतमासस्य जीवसर्वस्वमितिपाठः॥ जीवितरूपं

सर्वस्वमित्यर्थः॥ अत्रजीवितपदेयावत्तावज्जीवितेतिसूत्रेण विकारस्यलोपेजीवमितिरूपं॥ सस्वपीतरेषु

पुष्पेषुत्वमेवोत्कृष्टतमामितिभावः॥ कृतुमंगलेत्यपिरूपकं॥ प्रथमं परिदृश्यमानत्वाद्धेतोर्मंगलं सर्वत्रस

र्वमंगलेषु प्रथमं परिगृह्यमाणत्वात् कृतोमंगलं सर्वेषुकृतुवसंतयोरुत्कृष्टत्वेत्वयेवकृतेति कृतुश्चासौ

मंगलश्चेतिकर्मधारयः वारणेदोपवाराद्वारपवारात॥ परस्त्रीतिकायाः॥ चूतांकुरप्रसादनं युक्तमेवाश्च चू

तमसिमितिपाठः प्रामादिकः॥ पंचमभणस्य पंचमात्विकत्वापत्तेः॥ द्वितीये कवचनादेशो नु हेतिपाठेपि वरमे

वं पंचमकेलेमुखलाघतिरुक्तासाविरहन्येततस्मान्नुमितिपाठेन्याय्यः॥ तेन मंतु वंतु मेतु एवमास्वनेनष्ठूवे १०८

एतस्माद्देशाद्भिन्नं वर्तते। परभृतिके किमेकाकिनी मंत्रयसे मधुकरिके चूतकलिकां दृष्ट्वा उन्मत्ता परभृति
का न वर्तते। कलात्कोकिलेत्यर्थः। कथमुपस्थितो मधुमासः। मधुकरिके तवेदानीं कालः एष मदविभ्रमगीता
नां। कलानुमरीचयः। सखि अवलंबस्व मां। यावदग्रपादस्थिता भूत्वा कामदेवार्चनं करोमि। यदिमपि अवल
ंबनफलस्य। अर्धं कामिलेख्यो तस्य संपद्यते। यत एव। एवं नो जीवितं हि ममास्थितं शरीरं। अपि प्रतिबुद्धः कोमलो
पि चूतप्रसवः। एतस्त्र अत्र वसंतावतारे एषो इति पाठे एषः। बंधनवृंते मे गाः तत्र पुरा मिलिता वा तिदानेव तथा वृंतमा
यांबंधनं स्मरतामिति रूढः। कपोतहस्तकमिति। तल्लक्षणं संगीतरत्नाकरे। कपोतासौ करौ यत्राश्लिष्टमूलाग्र
पार्श्वकौ प्रणामे गुरुसंभाषे इति। त्वमासि मयावधूतांकुरदोहनः। कमायपगृहीतधनुषो। गृहीतधनुषः इत्येतेन
सर्वदा सन्नद्धतानिता। पार्थिकजनयुवातिलक्षापर्वतास्याधिका। धारोमवा। अत्र पर्वतास्याधिकचेहारस्या। सेवं
चेतेवल्लक्षणमतिशयोक्तिः। पटाक्षेपेणाति तिरस्करिणी तिरस्कारेणेत्यर्थः। नाप्रभूवितस्य प्रवेशो निर्गमो
पि चेच्छतोरनेनेकंचुकिनः। भूवनाभावाद पटीक्षेपेण प्रवेशः। तत्र कुपितत्वे हेतुः। कंचुकिलक्षणमुक्तं प्राकृ।

मातावदितिभिन्नंनाकं निषेधोऽनात्मज्ञेस्वभावानभितादेवनप्रकारणान्तरात्तादुष्यंतेनाकिमारभसेकि
मर्थमारंभंकरोषि।त्वयाप्यधुनारंभएवक्रियतेसोऽपिकिमर्थमित्यर्थः।इदमेवकोपकारणं।प्रसीदवा
र्यः।अगृहीतार्थेऽगृहीतनिषेधस्वप्रत्यक्षस्वरूपेऽत्रावा।वासंतिकैरेतत्कालोद्भूतपुष्पैस्तरुभिरपिवेतनैस्ताप्र
माणीकृतमेवावेतनैस्तत्प्रमाणीकृतमेवावेतनैरपीत्यपिशब्दार्थः।शासनमाता।शासनंनन्दृणदत्तोर्थाय
च्चिन्नरलेखशालिप्रियितिहेमः।अप्रमाणीकृतगाम्भोल्बेज्ञा।वक्रमाणानांवस्तुस्वभावादेवतथात्वात्।अ
वासंबंधेसंबंधरूपातिशयोक्तिः।राजाज्ञायास्तद्रूपत्वंतद्वताऽसंबंधान्।तदेवदर्शयति।तथाहीतिभू
तानामितिभूतानांकालिकामंजरीतिजात्यभिप्रायेणैकवचनं।कालिकाशब्दोबाधितमुख्यार्थः।अभिनवोद्
तसाधर्म्यान्मंजरीलक्षयति।अविकासितफलं।वहिर्निर्गतापिस्थिरातेप्राक्तिन्नापित्वंत्वीयमात्मीय
मितियावत्कन्यावस्पर्शवनितारजःपरागेणबघ्नातिनपुष्टंकरोतीत्यर्थः।यथाकावनबालाऽस्पोढत्वया
रजोदर्शनंनयातीति।समासोक्तिरियं।इदमपिहेतान्बहिर्निर्गतमपि।इत्यत्रशब्दोबाधितमुख्यार्थ

सन्नयः संनद्धः समुद्गाय बहिर्निर्गच्छतीति बहिर्निर्गमनसाम्यात्कुरबकं कलन्नयन्नीतिशोभावत्त्वं ध्वनतीयत
कुरबकं शोणाङ्कुरं स्तम्भुष्यामिति ज्ञातावेकवचैनं। तत्र शोणोङ्कुरबकः स्तम्भरः। तत्कोरकावस्थयाकालिकाव
स्थयास्थितं अत्र कोरकत्वेन जहातीति कार्याभावे वक्तव्ये तद्विरुद्धलेनोक्तिः। गते पि शिशिरे वसंतारं
भसमये पुंस्कोकिलानां रुतं कंठे भुस्खलितं तथा स्फुटः पुंस्कोकिलत्वेनोनजात इत्यर्थः। अत्र च विर
निर्गतादेः कारणस्योक्तेस्तत्कार्यस्य परागादेर्निषेधान्मालाविशेषोक्तिः। नच्चत्राविरोधवाधकापिश
द्धश्रवणाद्विरोधाभास एवास्त्विति वेन्न। कर्पूर इव दग्धोपि शक्तिमान्यो जने जने। हरतापितनुं यस्य
शंभुनानहृतं बलमित्यादौ सत्यप्यपिशब्दे विशेषोक्तेर्दर्शनात्। उक्तं च राजानकरुय्यकेन। कार्याभावे
नेहोपक्रान्तत्वा हूलवत्ता कारणसत्तायाः एव बाध्यमानत्वेन तु तया कार्याभावस्येत्यन्योन्यबाधकतानु
प्राणिताद्विरोधालंकारेदः इति। ननु दग्धत्वस्य शक्तिमत्त्वस्य च किमत्वस्य दग्धत्वे तनुहरणत्वस्य बलह
रणं तस्य च तनुहरणत्वमिच्यन्योन्यबाधकत्वं प्रतीयत एवेति चेन्न सत्यं। यथा विरोधे सत्यापि भिन्नविषय

शा॰टी तेनां संगतेन विरोधाभासत्वं । एवं कारणाभावे कार्यसत्वेन तत्र वसति तदभावरूपत्वे वंरूपविषद्वयद्वयपरित्यागे
११० नैव तस्य विषय इति ज्ञेयं । अपवादविषयं परित्यज्यैवोत्सर्गस्य प्रवृत्तेः । इष्टपतेर्वै तद्व्यतिरिक्तविषयता वास्य ।
ज्ञेयपतिव्रताय वकुरुते । विशालैरपि भूरिशालैः कुपतिमपि कलत्रं वल्लभमभिन्यादवितिसर्वं निरवद्यं
स्वभावो निश्चामकितोऽनीतः स्मरेऽपि चरणार्द्धकृष्टत्वं तूणीरादर्द्धनिष्क्राशितं शरं संहरसांके रक्षुवेन्नार्यां स्व
त्रीभीतत्वे शरसंहरणमुन्नयमुत्प्रेक्षे । कामस्यमूनम्रता दूसतत्तुष्णाणामसकलो सन्नत्वादिपमुत्प्रेक्षा ।
कामस्य मू...रतादूसेतत्तुष्णाणामसकलोत्सन्नेतादिपमुत्प्रेक्षा । अस्याव दूर्ववाक्यार्थत्रयं हेतुत्वेन योऽस्या
काव्यलिङ्गं । स्यस्येति क्रूरकारेतिपुरोपीतिच्छेकवृत्तिश्चानुप्रासाः । शार्दूलविक्रीडितं वृत्तं । नास्ति संदेहः महा
प्रभावो राजर्षिः । तयोः स्त्रीत्वा यथाश्च तया हितया । कंचुकिनो नाएकप्रभावातिशय वर्णनीयतया वएवमु
तरं आर्यकातिदिवसान्यावयोर्मित्रावसुना राष्ट्रमेणानाद्दिनीपादमूलं प्रेषितयोः कतिविहितानानीन्यन्य
यः । वृक्षं वनौप्रमदवनस्य पालनकर्मसमार्पितम् । तदागंतुकतयाऽश्चात दूर्वेश्च वाम्यामेषवृत्तांतः । जयतु य ११

ज्ञातं तज्ज्ञातमित्यर्थः। आर्यि कौतूहलं नो यद्यप्यनेन जनेन न श्रोतव्यं अस्य श्रवणयोग्यमित्यर्थः। तत्कथयतु। अ
यं किंनिमित्तं मत्त्रायसातोऽश्ववः श्रांतिच्छिद्भः। उत्सवप्रियाः खलु मनुष्याः। गुरुणा कारणेन नवितव्यं। अन्यादेशोऽनि
राकृतिस्तल्लक्षणाय कौलीनं लोकवादः। स्मा कौलीनं लोकवाद इत्यमरः। अन्तराष्टियमुखोतया वेदगुलीयकदर्श
नं मे इति प्रमया। इति यदेवमस्य तदेवेन तदा प्रन्थेती। तिसंबंधः। रमयामीति। रम्य स्वकु वेद न वंडपादादिकं दृष्टिवन्नुषा
पितपरपतीसर्थः। अक्रांतिनिरमातेतुरायथा तथानसेव्य ते पूर्वेतु कार्यापीन्नितयास्रसुनास्यवसंतरायेन्नामित्यर्थः। पू
र्वं प्रत्यहं स्नुनानयथा पूर्वेन प्रच्यहं इत्युनयं विरखेपं। शय्यानां नशय्यायाः। प्रांते गुनमाश्रेयानि विवर्तननानि
परिलुठनानि नस्वापस्तेरात्रिं ईगातानि इएवेति पूर्वेत्र हेतुस्तेन योज्यं। तृपानिशाः। नतु निसां विगमयातिविरुद्धं उ
पथास्यास्तथा नेवाउयाति नतु गच्छति। पदीतः स्तु रेभ्योदेवीमय दाक्षिण्येनासंतानुरोधेन दाक्षिण्यं नाम बिंबो।
ष्टिबैर्विकानां कुलव्रतमित्युक्तेः। एतेनातावरपकसंधानितं उवितामित्यवस्थापेन्नणीयसंधानितं उवितामि
चवरयापेन्नणीयसंधानितं। ईदृशीवावंददाति तदागोत्रे प्रुनाममुगोत्रं वनाम्नि वेत्यमरः। स्खलितोऽन्यनाम

शा॰टी ग्रहणं कृतान्यनामग्रहासन्नविरमतिकालं व्रीडयाविलक्षो विस्मयान्वितोभवति। विलक्षो विस्मयान्वितः इत्यमरः।
११२ अहं राजा दुष्यन्तः मम माध्यस्ता दृशी अवस्थाति त्वमनसि स्वास्मिन्नेव विविसास्मिय इत्यर्थः। अत्र पश्चात्तापादिके कार एव
कवेयत्नलकार्यस्य रम्यद्वेषा देवेवं नंततस्यान्योक्तं। कापालिंगा। पुराप्रेति प्रप्रेतिन्नन्नेद्दी तिष्ठे कावृच्चनुप्रलो। दृ
तमनंतरोक्तं। प्रियंमेऽस्मात् दुर्मनस्यादिति व्यधिकरणे पंचमी। अस्मात्कारणात्प्रभवतः समर्थात् विकारादित्यर्थः।
वैमनस्यात् दुःखेगात् युज्यते प्रविश्य पटाक्षेपेणोत्याद्येतदं तेन द्युतिनामक मंगमुपक्षिप्तं। तल्लक्षणं दर्पणे। तर्जनोद्वे
जने द्युतिरिति। एतच्छ्रुत्वा तह इति तथेति। प्रतीहारी लक्षयात्मुक्तं शाकु। अहो आश्चर्यं सर्वविस्मयं हितं। अर्था
तरन्यासः। एवमित्यादि उत्तरवाक्यार्थकः सर्वस्तु यदा याद्दश्यो या उपस्थिता तस्तोत्सुता रूपेणारमणायत्वमित्यर्थः।
उत्सुकः विरहपीत्यर्थः। एतदवस्थायाः अन्यत्र प्रियदर्शनत्वमपि राजृद्योत्यं। अत एवार्थांतरन्यासो विशेषपदं।
तथा हत्वभयपरामर्शः सएवपद्येवाच्येन सर्वं शिवीगेनो त्वरं शस्येतित्रैर्यो प्रत्यादिष्टेति प्रत्यादिष्टो निराकृतः। विशेष
मंडनस्य प्रद्वेषस्यांगदंगुलीयकमुकुटादि विविधीरणा वियेनिसः। अनेनांगात्य प्रभूषितान्येवकंकणाद्येविभूष ११२

यौ॥ येन भूषितकञ्जीति तद्रूपमित्यालितं यं ध्वनितं। वामस्य प्रकोष्ठस्य मणिबन्धेऽर्द्धलग्नस्यापि तदन्त॥ प्रकोष्ठो विस्तृत
करेभ्यस्य कञ्चीतरे पि वकूर्परादूर्ध्वरेखापीति विश्वः॥ कांचनमेवेत्यन्यासं स्पष्टत्वेनातिशीतलत्वाविन्नये द्वितीयस्य वोदु
म सामर्थ्यात् इति श्रेष्ठ अन्यस्य स्तनला न्तत्ं। वामग्रहणेन विरुद्धार्थमिव स्वपं धारणमुक्तं। अत एव एकमुख्यैः सर्वदा सत्त्वीत॥
एकमुख्यान्यकेवलाः॥ इत्यमरः॥ अत एव वामप्रकोष्ठस्यार्पितं दत्तमिति भूतत्वं तो एते नैतन्मात्रे गौ दशोऽला विशेषो ध्व
नितः॥ स्वात्मसेन विरहित्वादुःख नापरकष्ठ्यपाटलोन तदन्तरं अथ रोयस्य स॥ तादृशे स्पैवशोलाहे तु त्वं ध्वनितं। चिंतयार्शे कु
तलागतयायज्ञा गरणेन प्रकर्षेणातीते स्नानेनयस्य स॥ जागरणेन रक्ताञ्जातत्वं तेन वशोलातिशययोगि त्वं ध्वनि
तं। एतस्य स्वभावो हि त्रिपरिकरालंकारश्च॥ आत्मनस्तेजो गुणाद्धीक्षिलदत्तात् द्वीणोऽपि कृशोऽपि द्वीणत्वेन न आलक्ष्यते
कस्य संस्कारार्थम् उद्दिखितः उद्धृष्टो महामणिरिव महाशद्धेन जात्यत्वं सर्वगुणविशिष्टत्वं महत्त्वं च ध्वनितं। यथा शा
णोल्लिखितो महामणिः स्वतेजसा क्षीणो न दृश्यते तद्वदित्युपमा। अनेन महामणेरुपमानेनीतः सारतामनोहरता
सर्वदा दृश्यमानेष्वपि वित्ततता च ध्वनिता। उक्तश्च लितिहत्यद्भुपासा॥ अथ चर्चितेति सीकल्यः॥ जागरेति निद्रा छे

शा० टी० दृशो व्रीडा इति तत्र तत्र प्रत्यादिष्टेति विषयनिवृत्तिरिति कामावस्था अपि सूचिता॥ इत्थमनंतरोक्तं अथवा नेनेनायकसा
११२ त्विकगुणेषु माधुर्यनामा गुण उपदिष्टः। तल्लक्षणं तु॥ तन्माधुर्यं यत्र गात्रदृष्ट्यादेः स्पृहणीयता। सर्वावस्थासु स
र्वत्रेति। अन्ये आचार्यास्तु नव वा सविप्रलंभे अन्याः कामदशा आहुः। अंगेष्वसौष्ठवं वैवपांडुता कृशता रुचिः। अधृतिः
स्यादनालंबस्तन्मयोन्मादमूर्छनाः। मृतिश्चेति क्रमाज्ज्ञेया दश स्मरदशा इहेति। प्रत्यादिष्टेत्यादिनांगेष्वसौष्ठवं। व्री
डा इति कृशता। रम्यं द्वेष्टि यथा पुरेति स्वपद्येऽरुचिः। अरुचिर्विषये वैराग्यमिति लक्षणं। दाक्षिण्येत्यादिनाधृतिः। सर्वत्रा
रागिताधृतिरिति लक्षणं। स्थाने युक्तं। खलु प्रत्यादेशेन निराकरणेन विमानितापि अस्य कृते शकुंतला क्लाम्यतीति तत्स्था
ने इत्यव्ययं। ध्यानमंदमित्यनेनालंबनता। अनालंबनता वापि शून्यता मानसः स्मृतेति तल्लक्षणात्। प्रथममिति। ११२
सारंगस्य ईक्षणे इव ईक्षणे यस्यास्तया। अनेन तद्दर्शनमात्रेण प्रतिबोध उचित इति व्यज्यते। तत्रापि प्रिययात्यंतं हृ
द्यया शकुंतलया प्रतिबोध्यमानमपि स्वत एव प्रतिबोध उचितः स नास्ति। अपितु प्रयत्नेनापि प्रतिबोध्यमाने सुप्तमो
हमुपागतो। अत एव हतहृदयो। दुष्टहृदयः स प्रत्यर्थुनानुशयदुःखाय प्रशान्तापदुःखाय विबुद्धः। अत्र वर्त्वीढे

विशेषो हिः॥ तत्र प्रविविशेषा लावस्तन्नहि रुद्धे न सुन्नपदे नोक्तः॥ उत्तरार्द्धे विसाव्यना। उपमानुप्रासौ वा। न खलु दृष्टानीति राजो
क्तौ तु वादः॥ तपस्विन्या अनुकंपा हयिालग ध्येयानि लिखितं एष भूयोपि शकुंतला व्याधिना। शकुंतलायाः सकाशाद्यो
व्याधिस्तेन। अथवा नृपकं शकुंतलैव व्याधिरुद्वेगदायित्वात्· नजाने कथं चिकित्सित व्य इति प्रत्यवेक्षितां इति। रा
ज्ञो निः॥ शीकरसीकारस्तारमर्थं प्रत्यवेक्षताराग्मिति नीतिः॥ विज्ञेयं प्रमदवनं नृपस्त्र्य यस्मिन् स्त्रुह्ये तैः॥ सहरमते उरोपकंठ
इति हला सुखः॥ चिरकालेणाप्रबोधनाज्जागरयान्त्या यद्देव आज्ञापयतीति। वातायनेति कं तु किं नाम नियोगम
धिकारी॥ क्त तेल वतानि महिके। संप्रति शिशिरातपच्छेद रमणीयेनाप्यत्यैति शिशिरेनाप्यातपः॥ अस्मिन् प्रमदवन प्र
मदवनोद्देशे आत्मानं रमयिष्यसि। रंध्रोपनिपातिनः॥ छिद्रेषु अनर्थाः बहुलीभवंतीत्युक्तेः॥ मुनिसुतायी शकुंतला
यीराज्ञो मुनिसुतालेन प्रत्यभिज्ञाना तथोक्तिः॥ यः॥ प्रणयस्तस्य स्मृतिस्तस्या रोधिना तमसा मोहेन इदं मनः॥ सुहृत्क्व
प्रहरिष्यता मनसिजेन धनुश्चूतशरो निवेशितः श्च। ममतद्वियोगेवसंतकालस्य प्रादुरभूदित्यर्थः॥ वा वेक का
लत्वं द्योतयतः॥ सम्मुखयालंकारः॥ तेजेन तन्म्य दृष्टादपि स्मरणे स्मरणालंकार इत्युक्तात दलंकारेदस्तुदाहृती। अनुप्र

शा०टी० सख्याद्भुतविलोकितेहत्ते। तिष्ठ तावदनेन दंडकाष्ठेन कंदर्पव्याधिं नाशयामि। कंदर्प एव व्याधिर्यस्मादिति कंदर्पव्याधिं विश
११३ द्रेन हतो कुरु तेऽहं इति ज्ञेयं। न चासनपरिचारिका चतुरिका नवता संदिष्टा। परिचारिकाह्ल दृत्तासुत्कं मालतीगुल्मवार्ये॥
न२ सौवाहनेनैव सेवत तथा वैवधसाधनो। तथान्तरणसंयोगे माल्यसंग्रथने क्षुधादि ज्ञेया नाम तः॥ सा तु नृपतेः परिकेति वा।
माधवी मंडपे इमां वेलामतिवाहयिष्ये। तत्रैव मे चित्रफलकगतां स्वहस्तलिखितां तत्रभवत्याः शकुंतलायाः प्र
तिकृतिमानयेति। ईदृशो हृदयविनोदनस्थानमिति अन्यः॥ तत् तस्मात् मे वमार्गं माधवीलतामंडपमार्गमादेशय। इत इ
तो भवान्। अपषमणिशिलापट्टकसनाथो माधवीलतामंडपः उपहारः तु स्तोपहारस्तेन या रमणीयता तया निःशं
सयं स्वागतेनेव नो स्मान् प्रतीच्छति। तत्प्रविश्य निषीदतु भवान्। लतासंश्रिता इच्छामि तावत् सख्याः प्रतिकृतिं त
तस्या भर्त्री वृद्धिं सुखमनेकप्रकारं अनुरागं निवेदयिष्यामि। इदानीं शकुंतलायाः सर्वं उपाय महत्तीते स्मरामीति ११३
सैवं वः॥ प्रत्यादेशवेलायां निराकरणसमयेन विस्मरामि किं तु सर्वं कथयित्वाऽवसाने तु नः परिहासविकल्प ए
षभवेन भूतार्थमित्यार्थ इति भर्तृन्मदाद्दैत्ये तन्मितमरः। आख्यातं मयापि मृत्पिंडबुद्धिना स्थूलबुद्धिना तथैव गृ

हीती। अथकामदित व्यत्तावलवती। एवमेवैतत्त्वोलोः किमेतत्त्वत्रनौ वित्यमित्यर्थः। अनुपपवैं खल्वी दृशीत्वयिसर्वदा
धीरे राज्ञि स्वयं दुष्यंते कदापि सत्तुस्याः शीव वह्नाव्यानभवं ति। शोके जाते ऽन्येनवह्नव्यानभवेतीत्यर्थः। अपरक्त त
प्रशंसा। तत्रह दृष्टांतमाह। न तुप वाते प्यतिशयितत्वा तेपि निर्घंपागिर यथः विह्न्वा वाया विह्नलायाः। न विह्न वाया
विह्नलायाः न विद्यते मारसां रहितायस्य मतथा। इतरति। इतो मत्ताः प्रत्यादेशा लज्जजनेमोतम्यादि कमनुगेर्दुं
यवस्सिताप्रयत्नं कुर्वाणामुङ्गरनंतरम् उच्चैस्तिष्ठतिगुरोः पितुः। शिष्यस्तस्मिन्गुरुसमे करवसमे वदति सतितुनरने
तरं वाष्पस्यप्रसर आविष्कृतेनकलुषाद्दृष्टिं कूरेकविनेइदंवीगयावकाशदानाय। यथा तद्धेहं न तति तिन्निमेद्दिरमि
त्यादौ। मयिनिर्दयेरा हृदये परापकारनिरतेता दृश्ये निरूपाधिर्वेवके ऽलीक धर्मिकं तुके इत्यर्थे ति रसेक्रमितवाची।
अर्पितवती प्रतन्मोद हति। प्रवहदृष्टेदहि कत्वासे भवान्मुख्यार्थविधेकार्यकारणासं वंधा त्रापेल दयतत्तदति
शयं व्यंजयतीति। दहतिप्रदमत्यंततिरस्कृतवाची। किमिव सविषंशल्यमिव विषाक्तः शर इव अशल्यं शक्ते शरे
वेसकं विकार्यो वत्तोमर इति विश्वः। उपमानुप्रासौ। तादृशदृष्टे स्वादृशे ऽपरागत्समं च। गुरुशिष्ये गुरुसमे इत्यः।

तोष ३

शा॰टी॰ त्रकथितपदत्वेन शंकनीयौ। तात्पर्यं सिदेन लाटानुप्रासार्थमेव तथा प्रयुक्तत्वात्॥ ३ नत्र त्रपदे वचनस्यावश्यकारित्वेन

१२४ यकारस्याल्पद्योतनादि तात्पर्यमवगंतव्यं॥ शिखरिणी वृत्तं॥ अमूहे आश्चर्यं॰ ईदृशी स्वकाय पिरते त्यर्थं ति रन्यासः॥ अस्य

संतापे नाहं रमामि मम संतोषः इत्यर्थः॥ संतापेनं दृति विषमीएतद्वाकार्थसमर्थकः॥ स्वर्वोक्तोर्थं ति रन्यासः॥ यथाय यथाऽस्य

तापस्तथा तथा शकुंतलानयनोपायं प्रतिप्रत्रेयेवाहं भविष्यतीत्याशयः॥ अस्ति मे वितर्कः॥ केनापि तत्रत्यवती आका

शचारिणा नीतेति॥ पतिदेवतीपतिव्रतीपरामृष्टुं स्प्रष्टुं जन्मप्रतिष्ठा जन्मस्थानी॥ प्रतिष्ठा स्थानमात्र कइति विश्वः॥

सीमो हः खलु विस्मयनीयः अस्यलावलात्रप्रति वोधः स्यालाव्यात्तस्येत्यर्थः॥ यद्येवमस्ति खलु समागमः कालेनेत

त्र भवत्याः॥ नखलु मातापितरौ भर्तृवियोगदुःखितां दुहितरं द्रष्टुं पारयतः॥ शक्नुतो नखल्विति संवंधः॥ स्व॰ न इति॥ ता राम ११४

त्यक्तं तलालदृशौ वस्त्वसंनिहितैव तु न निर्वि न्नभावाय अनेनोत्कंठातिशयो व्यज्यते॰ अतीतं गतं॰ तत्रस्वनादि लिख

त लिखितर्केरत्यंतासंलावनीयदर्शनीयत्वं व्यज्यते॰ तत्र अदृष्टमप्यर्थमिदृष्टवैभवात्करोति सुखिजनदर्शना तिथि

मिस्तु हे॥ स्वनेसंलाव्यतएतदिति स्वे नो त्विति शर्वंवितर्कः॥ स्वनेस्वे त्स्याऽज्ञायदवस्था यां नाद्य भव्यते इत्यत आहमा

याल्विति मे त्रतेत्रा स्यामस तःप्रकटनं मायातस्याःकपटघटितत्वा हिषयसत्वात्तावदिति सा वाः स्यादेवं यद्यधिष्ठानं नप्र
तीतं स्याद् तत्र आह। मतिभ्रमो त्विति। तेनान्याधिष्ठानेश कुंतलाभ्रमः इत्यर्थः। स्यादेवं यदि व्यवहारदा मत्वं न स्यादत्र आह।
तावत्फलं अतएव ह्लिष्टं तु एवं तु इति। यावा व्यवहारः संताप एणादिरूा तस्तावदेव फलं यस्य तत्तत् ह्लिष्ट मत्यल्पी। तादृशः
कश्चिद् स्तुत्कृष्टो व मीः प्र वजिननै त्यल्पए वा वरितः यस्यता दृगल्पी फलमित्यर्थः। ससंदेहालंकारः। अतःपरं एते
ल्पयो च्यमानाम यावा आशंस्यमानाम मनोरथा। नामेत्यलीको अलीका मन्येरथा इत्यर्थः। तेतटप्रपाता इति स्विन्नरू
पकं। यथा वर्षासमये गंगादेस्तटा ऽघेनपी थ्यमाना ऽअहमहमिकया पतंति एकःपतंति तदुपरि अन्यस्तदुपरीत
रः। एवं मनोरथानाम एकेविलीयन्ते अन्ये उत्पद्यंते तेपि विलीयंते तेत्तदितरे उत्पद्यंते इत्यर्थः। प्रपातस्त्वतटो भृगु
रिति कोशात् तुनरुक्तवसदाभासः। नु मानुमेति मे तेमते तिच्छेदरकष्टत्यनुप्राप्तौ। द्वादशी उपजातिरिंद्र वज्रोपेंद्र
वज्रयोः। मैवेति। न त्वं तु लीयकमेव निदर्शनमुदाहरणं। अवश्यंभावी आर्विंतनीयः समागमो भवतीति। विदर्भकथ
अइएधमित्या हिनाएतदं तेन प्रयोजनानामी गन्तुपदिष्टं। तत्सदृशी दशरूपको सिद्धा मे चरणतो भाविदर्शिकास्यात्।

शा०टी० प्ररोचनेति। न सुलभम् असुलभं तच्च तत्स्थानं चेति तस्मात्। भ्रंशो ऽस्यास्तीति तत्। शकुन्तलांगुलिभ्रंशीत्यर्थः। अत एव शोचनी-
११५ योऽतवेति। हे अंगुलीयकरत्न निश्चितं तव सुचरितं पुण्यं ममेव प्रत्यनु अत्यल्पं विभाव्यते ज्ञायते अतीन्द्रियस्य धर्मस्य प्रत्यक्षत्वं
कथं ज्ञातुं शक्यत इत्याह। फलेनेति। अत्यल्पफलत्वेन हेतुनेत्यर्थः। ममेवेति सहोपमा। तेन ममापि पुण्यमल्पं तवापीत्यर्थः।
तत्र स्वस्याल्पपुण्यत्वे हेतुः पूर्वं दर्शितः। अस्याल्पपुण्यत्वे हेतुमाह। अरुणेति। यद्यस्मात्त्वं स्याः कदाचित् कनिष्ठि-
कायां तत्राश्रितं स्थितं अन्यांगुलौ तत्रापि तथाविधमितरांगुल्यामिति वक्तव्ये नाति प्रायः। प्रेमातिशयेन वामहस्तांगि स्पष्टेष्टि
केवलसर्वांगुलीभूनिक्षेपः। यद्वा विरहातिकृशतयाङ्गुलीकृतास्तु पंचस्वपि अंगुलीषु विन्यासात् वक्तव्यवचनोपपत्तिः।
तथा वालितं युक्तम्। तस्याः किंविधसुभगतदभ्लानवं त्वाद्रियो येनाकस्मात् इत्यपदवीमंगुलीयं प्रयातीति। लब्धपदं
महता भाग्योदयेन यथाकथंचित् प्राप्तस्थितिरपि सत् च्युतमसि। कीदृशं अंगुलीभूषणं नखेनाया सुताः। नखेति
तलस्याप्युपलक्षणम्। तासां तामनोहराश्च नातिस्थूला नातिकृशाः नातिह्रस्वा नातिदीर्घा नवलाकाः सरला इत्य- राम ११५
र्थः। एतेन स्वयोग्यत्वं ध्वनितम्। उक्तं च सामुद्रिके स्त्रीलक्षणे॥ नातिह्रस्वा नातिदीर्घा न स्थूला न कृशा अपि वक्राः

सरलारक्तनखारक्ततलाश्चापि। कामलाःसितविंदाद्याःसंगुरादीमिमन्नखाः। तादृग्गुलयोर्यस्याःसा लवेडाजवदद्वसेति
अनुमानकाव्यलिंगानुग्राह्याः। नन्तुममेवेति वत्कमलमिवम्नुखेमनोज्ञमेतत्। इत्यादावपि सहोपमा किंनस्यात् इतिचे
उच्यते। प्रकृतस्तुपमेयमप्रकृतस्तुपमानमितिसाधारणी स्थितिः। यत्रोभयमपिप्रकृतं इवशाद्दप्रयोगश्च तत्र सहोपमेतिर
हस्यं। यथा आदायशेषामिवमन्तुरिज्ञामित्यादौ। उभयस्यापिप्रकृतत्वेनविधेयत्वात्। अन्यत्रतु अतिशयप्रापकत्वेना
प्रकृतस्योपमेयस्यानुवाद्यत्वात् इयं च साधारणधर्मस्य वाच्यत्व एव संभवतीत्यपि ज्ञेयं। दुष्पितायाहृत्तौ। यद्यन्य
हस्तगतंलवेत्क्तयीशोचनीयेलवेत्। इयंनामंमुग्धाकेनोतेनकेनोपक्रमेण उद्धृतः। कथ्यतेधीरैः स्खलितेसमुपक्रमे इति
वरणिः। तत्रभत्याः शकुंतलाया हस्ताभ्यांहस्तैनेक दूंशापितालयातस्येकिमर्थदत्तेतिवचनेऽनोचित्यप्रसंगादे
तोदृदुक्तिः। ममापिकोऽहलेनाकारितएषः। आकारितइवेतिगम्योत्प्रेक्षा। ममाप्येतच्छुवणेकौतुकमासीत्तदेवानेन
दृष्टमितिभावः। किंयद्धिरेणकियताविलंबेनप्रतिपन्निं च दृत्तिं वा निमितियावत्। प्रतिपत्तिः बद्धत्तौ स्यादितिधर
णिः। एकैकमिति। अत्रकृडिकार्यादिवसमदीयमेकैकंनामाद्वरंगणाय यावत्तद्गणनमेतंगृहित्यावद्गणनसमाप्ति

शा०टी० ११६ रित्यर्थः। विवक्तुरेदि नैरितिलावः। हेप्रिये मम अवरोधगृहे तत्र प्रवेशसमये नेता प्रापयिता जनस्तव समीपमुपेष्यतीति। इतिम
यापि प्रत्यपि हितेति संबंधः। छेकहत्यनुप्रासो काव्यलिंगं वा वसंततिलकं वृत्तं। मया विस्मृततादृशस्नेहेन दुर्लनिष्ठुरं हृदये रो
त्यादि व्यंज्यते। दारुणात्मनेति संबंधः। छेकहत्यनुप्रासो काव्यलिंगं वा तादृशव्यंग्यावकाशदानाय। रमणीयः। हल्लव शि
विधिना दैवेन शापलक्षणेन वविसंवादितस्थ कथं धीवरकल्पितस्य कैवर्तखंडितस्य रोहितमत्स्यस्योदराभ्यंतरे आसीत्।
शचीतीर्थ इति गंगायां शक्रावतारापरपर्याये तीर्थविशेषः युज्यते। अत एवांगुलीयकादर्शनाद्देवतपस्विन्या अनु
कंपा हृदयिः शकुंतलायाः। अधर्मभीरोरस्य राजर्षेः परिणाये संदेह आसीत्। अथ वेदृशोनुरागः अभिज्ञानमपेक्षते क
थमिवैतत्तथापान्नानादस्याई हि श्युक्तिः। उपालभ्येयमस्योपालंभं करिष्ये। अनेनोन्मादः। गृहीतो नेनपंथा उन्मत्ता
नां। कथमिति। त्वितिप्रश्ने। वंधुरा सुंदरः कोमलाश्चांगुलयो यत्र तौ। वंधुरवंधुरेरम्येइतिविश्वः। एतद्विशेषणाप्र राम
योजनमेतत्स्वर्वतिरपद्येनि नरूपितं। तेरक्तोत्पलछविमतिम्रदुलं मया वारं वारं स्वहृदयन्यस्तं येनातिप्रीत्याततवधार ११६
णीकृतं तदुरवपरि॰ स्फुरीतकरं विहाय। अनेन बुद्धिपूर्वकस्त्यागउक्तो नमोहादिः। कथमंभसि निमग्नमसि। त्वं

त्वलीकरणीतेनतवदृश्यत्वमेवप्रयोजनं तत्करस्थमपिदृश्यमेव स्थितं सद्यदंतसि नितरांमग्नम दृश्यत्वंगतमितिकथं।एवं
तत्करत्यागस्तेनाप्यदृश्यत्वगमनमितस्तुपालंसदृयी।तत्रचेतनव्यवहारारोपात्समासोक्तिः।साकगुरुत्वात्स्वाभाविकोजलपातःस्तत्वे
दैकत्वेनोच्यतइतिस्वाभाविककृत्रिमयोरभेदाध्यवसायादतिशयोक्तिगर्भा।अथवेतिदृष्टान्तोदेपालंकारः।नामेतिप्रसिद्धौ।अचेत
नैकर्तृगुणेसौंदर्यादिकंप्रेमादिकंचनलक्ष्ययोदित्यर्थः।तिरन्यासः।त्वयात्वचेतनत्वादिदैकृतं।मयातुसचेतनेनापित्यक्तुमितितत्का
रिणात्वं प्रतिकिंवक्तव्यं।मयैवेत्येवशब्दार्थः।कस्मादकारणमित्यर्थः।स्त्रीमात्रेणापितुप्रियापूर्वधीरितातिरस्कृतान तु त्यक्ता।
त्यक्तायाः पुनरुपादानेमहापुरुषस्यानौचित्यप्रसंगात्।अत्रवधीरणकारणाभावेतदुत्पत्तेर्विभावना।अक्तितिहृत्पुत्रासयो
र्सकरमवैमर्ध्वं वृत्तौ।कथंवस्तुद्वयारवादयितव्योऽस्मि।असावुन्मत्तोऽतएवविषयांतरसंचाराभावान्मयालोजनार्थं गंतुम
शक्यमितिभावः।अथचाहयथावुभुक्षयाभक्षितव्यस्तथाचायमपितयाभक्षितव्यइत्यपर्थः।प्रकरणवलात् वुभुक्षे
तिस्त्रीलिंगनिर्देशाच्च।कस्मादवधीरिताप्रियेत्यत्रप्रियास्मरणात्सेकल्पोपनीतोऽपियौवत्याह।अकारणेति।अकारणंयःपरि
त्यागस्तेनानुशयःपश्चात्तापस्तेनतर्तिहृदयंयस्याःसा।अत्रपरित्यागस्येलकथंकारणताधाकारणाभावस्येलकथंपरित्याग

मू०टी० ११७ इति विरोधो नाशंकनीयः॥ अत्र च कारणशब्देन प्रसिद्धेनायिकापराधादिकं गृहीतं तदेव तत्त्यागे कारणं दृष्टवरमिति॥ अने
न विचित्रफलकहस्तायाश्चतुरिकायाः सखीः स्त्रवितायाः एव पटान्क्षेपेणाप्रवेशोति त्वरासूचनाय॥ इयं चित्रगता महिनीत्य
नेन यद्राज्ञा पुनर्निर्दर्शनीया चित्रे तदनया भंग्या कविना संपादितमत एव पश्चाच्चित्रफलकं दर्शयिती तु क्लिश्यसाध्वयस्य
ति लिखितैवाकार्या (मधुरं सुंदरं यदवस्थानेत्याह) कुतिस्तयाद दर्शनीयो दृष्ट्यः॥ लावण्यान्तु प्रवेशो भ्यंतरीकरणी सुंदराकारतया भा
वाविर्भावो रम्यतरः इत्यर्थः॥ स्खलतीव दृष्टिर्निम्नोन्नतप्रदेशेषु॥ अनेन मधुराकृतित्वमेवोक्तं यथा प्रत्यन्तदृष्ट्या माकृतौ
निम्नोन्नतेषु दृष्टिः स्खलतीति तथा चित्रेपीति महच्चालेख्यकौशलमिति॥ लावः॥ किं बहुनास त्यान्तु प्रवेशशीकया लावण्यैको
त्हलमेजनयति॥ एतदेवाह संशयाया हसा तुमतीं॥ अहो आश्चर्यं एषा राजर्षेर्निपुणता॥ अहं जाने सखीत्थं कुत्तलास्य
यतोमेवर्त्तत इति जाने इति संदेहः॥ यदृति॥ चित्रे यद्यत्साधु न स्यात् तत्तदन्यथा क्रियते यद्यपि तथापि तस्या लावण्यं किं राम ११७
चिद निर्वचनीयं या वरेखया चित्रार्थं त्लिकाविहितपाश्चत्यवशोभाविशेषेणान्विती संमार्ज्यरिक्षयोः लिख्यमानमपि शोभनातिक्रा
मतीति भावः॥ अन्यथा क्रियतोप्यथ वरेखया शोभयान्वितमिति विरोधाभासः॥ लावण्यलक्षणं रत्नाकरे मुक्ताफलेषु छायायास्तरलत्
वमिवान्तरा प्रतिभाति यदंगेषु लावण्यं तदिहोच्यते इति रेखालक्षणं संगीतरत्नाकरे

यतित्वमप्युमितं। ततश्च द्रविशेषणत्वेनापि योज्यं। नियत्या तिन्नमोह वन्तमोराहुर्यस्मि सस्तस्येति उपमासाविकाचात्र
निदृर्शनैव। अन्येत्वहृष्टांतमेवाहुः॥ अन्येसाधकप्रमाणत्वाविह्नुत्नयोः॥ संदेहसंकरमेवाहुः॥ अन्येसाधकप्रमाणत्वाद्वा
त्नयोः॥ संदेहसंकरमेवाहुः॥ जयति श्री आयुष्मिन्नयः॥ वाच्येनोति वाच्येरण क्रमप्रारंभेण गङ्गाद्रकंठत्वाज्जयश्च्द्र प्रतिबेधः॥ नविद्य
ते संस्कारो यस्यात एव पाटलवर्णश्चेतरत्नेपि पाटलरत्नमरः॥ एवंभूतमोष्ठपुटं यस्य तद्विति स्वलानोक्तिः॥ तेनचतिवि
नहक्लांतत्वं व्यज्यते पत्ताद्दशं तेमुखं दृष्टमिति विशिष्टं विधेयं। विशिष्टन्तु खदर्शनेन च विरहनाशः॥ अतएव जयइत्यवधा
तव्यो जयशब्दे प्रति बिद्धेपिजितमिति विरोधाभासः॥ जितत्वे प्रत्युत्तरार्द्धस्य हेतुत्वोपादानात्काव्यलिंगमपि। श्रुतिवृत्त्य
नुप्रासो। मातः॥ कएषः॥ वत्सतेसागधे यानिष्टछः। क्वचित्तु छेहीति नास्ति तस्मिन्पाठेन्नपकं। सुतत्विति कुतनावप्रियं इति
ष्ठति नस्तुतनाविति संबोधनं हेसुतत्विति। तत्र हृदयात्प्रत्यादेशव्यलीकं निराकरणाप्रियमपेतु। व्यलीकं त्वप्रियम्
तेइत्यमरः॥ विप्रियस्य हृदयात्त्यागे। यतिः॥ सिद्धेपि तुनस्त्रहृहर्यं विप्रियं मयात्यक्तमिति वाक्यात्रेण नत्यागोपितत्तत्सं
स्कारोन्मूलनपूर्वकं त्यागः इति ध्वनितं। किमर्थमप्रियं कृतं तत्राह। किमपि ईप्सितमनायस्यासौ किमपि मनास्तस्यार्किमपि

ना०टी०
१२६

मनसो मे तदा त्वद्दर्शनसमये बलवान्संमोहो ऽभूदिति विशिष्टं विधेयं तेन संमोहेन मनः समुन्मूलनं जातमित्यर्थः तेन वि
ज्ञानाभावात्कृतमिदं हीतव्यमिति भावः संमोहात्मनः संमूलनं जातमित्यस्यथा हे विधेयत्वेवक्तव्ये यदार्थे विधेयत्वेन तत्संमोह
स्य प्राधान्यद्योतनाय। तेन संमोहस्य मनो धर्मत्वान्मनसः संमोहो जात इत्यार्थेपि नरुहरे निरस्तं। प्रबलेति। प्रबलतमसा
माधिकसंमोहानीत्र तु प्रबलतमः शरहे नाधिकशोक उच्यते। तज्जन्यः संमोहो लक्ष्यते। तदतिशयो व्यज्यते। अत एवोद्भव
ति निर्हेश्य प्रक्रमभंगो न शंकनीयः। तमःशोके गुणांतर इति विश्वः। शुक्लेष्वकार्ये प्रवेदे प्रायाः शुक्लस्याग्रगण्या याः हृत्तयोस्तयोस्ताती
त्यर्थांतरन्यासः। हृष्टीतमप्याहाहस्त्र जमिति। अंबशिरसि निहितां परिशाविताः स्रजं मालामप्याहि सुधीकया भुनोति। अहि सुधी
कयेति श्रीति मात्रः। काव्यलिंगमस्रत्वं तु शासकं किमेतिमध्येमयीतिवलवलेति छेकानुप्रासाः। हरिणीहत्तं। राजाशाकुंतलायाः राम
पादयोः प्रणिपत्येत्यादिना तु नयोनाम भूषणमुक्तं। तल्लक्षणं त्वभ्यर्थनापरैर्वाक्यैर्विज्ञेयो ऽनुनयो बुधैरिति। उत्तिष्ठत्वाय हत्त्रतः। १२६
त्ननं नितिष्ठितमेसुवरितप्रतिर्वधनेपुराकृतं कर्मेत्यर्थः। तेषु दिवसेषु परिणाममुखे परिपाकोन्मुखे मायालोके साधकस्य वत्स
मारणत्वादतिदुःखदत्वं व्यंग्यं। मोहादिति। हे सुतनु मयापरमविवेकिना ऽधर्मशीलरुणात्यीत विदग्धेन दुष्पीतेनेत्यर्थांतर

सेक्रोतं॰मोहादज्ञानात्तेतववाष्पविंदुः जात्येवचनीउपेक्षितोनमार्जितोतएवाधरंपरितः सर्वतोवाधमानः क्लिष्ट
इतिशेषः॥ अनेनविंदूनामनवरतपातितास्खलतोक्षताद्ययावत्स्थितिस्थवनिता।तेनमार्जनकारणासामग्र्यांसत्या
मपियत्तदनुत्पत्तिः सा विशेषोक्तिः॥ मोहादितिनिमित्तस्योक्तत्वादुक्तनिमित्ता।तावदादावादित्वेकथनापेक्षयांतं
वाष्पंप्रमृज्यपश्चाद्व्यविगतानुशयोगतपश्चात्तापोभवेयमाशीसायीलिङ्।कीदृशी।आईषत्कुटिलेयत्यद्दतत्र
विलग्ने।अनेनास्यविंदुलाभावस्तदभावेनाधरपीडनाभावश्चध्वनितः॥ नन्वनुतस्यवाष्पस्यातीतत्वात्तमितिकथं
दृष्टेतिदृष्टिः कथमितिचेत्।उच्यते।यतः॥ चिरानुभूतोत्वंदुदर्शनोजनस्यदुःखानिनवीभवंतीत्युक्तदिशयाएतद्द
र्शनात्तस्याः पूर्वदुःखस्मरणोनयोवाष्पउत्पन्नः सतदृष्टेनराज्ञापरामृष्टः॥ दुःखहेतुत्वादुभययोः।आकुटिलेतिव्य
तिरेकः॥ यतस्तदाशोकावेगाद्विंदुरूपएवोत्पन्नोऽश्रुनाक्रमिकत्वात्तदवस्थापाप्तमनावदतिवोद्धव्यं।अतएवतत्
त्प्रमार्जनेनविगतानुशयत्वं।इदमेवोद्धृतविषादशल्यत्वं।यतोपराधादिनानुशयोहिविषादः॥ ततदुक्तंसुधाकरे।
अपराधपरिज्ञानादनुतापस्तयोभवेत्।विषादइति।हेतुरत्रानुप्रासो।वसंततिलकंवृत्तं।यथोक्तंमनुत्तिछति

शा॰टी॰ वाष्पमार्जनंकरोतीत्यर्थः। तच्चत्रिपताकवक्त्रानामिकयेतिज्ञेयं। तदुक्तंसंगीतरत्नाकरे। तन्मार्जनेवस्पादृषोयींति
१२७ मनामिकांनेत्रद्वेऽगतां विन्यसेदिति। अनेनकथयिष्यामीतियदुक्तंतत्संगोप्यप्रदर्शितं। आर्यपुत्रेदत्तंगुलीय
स्योपलंभः। प्राप्तिस्तस्माद्विषमीकृतमनेनयत्तदार्यपुत्रस्यप्रत्ययकालेदुर्लभमासीत्। तेनकारणेनहिनिश्चितं
लताकर्षीकृतोःसमवायःसंबंधः। तस्यापि ज्ञंकुसुमेप्रतिपद्यतां। अत्रत्वयाअंगुलीयकंधारणीयमितिप्रस्ता
तेयल्लताकुसुमदर्शनं तस्यप्रस्तुतउक्तः। सादृश्येनसाऽप्रस्तुतप्रशंसा। नास्याविश्वसिमि। आर्यपुत्रएवैतद्धारय
तु। राजा। अयिवेस्मृतिरित्यादिनाएतदेतेनपरिभाषणंनामांगमुपक्षिप्तं। तल्लक्षणं। मिथःसंजल्पनंयत्स्यात्त
दुक्तःपरिभाषणमिति। ततःप्रविशतिमातलिरित्यादिनाग्रंथनंनामांगमुपक्षिप्तं। तल्लक्षणं। उपक्षेपस्य
कार्याणांग्रथनंपरिकीर्तितमिति। राजा। अमृतंत्सीपादितस्वादुफलोमेमनोरथइत्यनेनप्रहर्षनामानाट्यालंका राम
रउपक्षिप्तस्तल्लक्षणंतुप्रहर्षःप्रमदाद्वाक्यमिति। लज्जामि। आर्यपुत्रेणासहगुरुसमीपंगंतुं। अभ्युदयकालेषु १२७
मंगलोत्सवादिसमयेषुइदमाचरितमेव। दाक्षायिणिदक्षपुत्रस्येति। अयंदुष्यंतइतिसम्बोधितःइतिनामप

वामर्शात्वाद्रूपरो निर्द्दिष्टः। तेन दुष्यंतनामधेयकः इत्यर्थः। भुवनस्य सप्तद्वीपमंडलस्य पालकः। ते पुत्रस्य ईडस्य रणशि
रःणशिरसि युद्धमुखे अग्रगामी अग्रेसरः इदमेव विधेयं। यस्य चापेन धनुषा क्षितिवल्लितिकर्म्म समापितकार्यं कोटि
मत्रं कुंठकोटिमदित्यर्थः। तेन युद्धे स्वमच्चैश्च न्यते। एतादृगपि मघोनः कुलिशं वज्रं अभरणीजाती वीर्यलिवरणस्य व
स्तनो श्रथितत्वेन वर्णितानुदात्तैः। नूपकंवास्यस्येति पयपायातियस्येति निर्ति तददितिमिच्छेक वात्युज्ज्वासौवावसत्र
तिलकं वृत्तं। संलावनीयानुलावास्यो हरितः संलावनीयः अनुलावः। प्रलावोयस्याः सा पुत्रघातिपिशुनेनपुत्रस्ने
हस्तवकेन पिशुनौरवलस्तवकावित्यमरः। इडोनयोः पुत्रः तस्य त्वं मित्रं चतस्त्वमपिपुत्रघायाः तत्रस्नेहः इत्यर्थः। दिवौक
सां पितरा वदितिकश्यपौ। धाद्रुविति। मुनयो व्यासादयः इत्यनेनेषां विप्रलंभश्रमकरणापाटवादिराहित्यं ध्वन्यते। तेन
च तद्दुक्तौ वैदानुमानेन प्रामाण्यं। द्वादशधा स्थितस्य द्वादशसु मासेषु द्वादशमूर्त्तिधरस्य तेजसः सूर्यस्याथ त्वोरणाम
मनीति। जगत्प्रदीपस्य विश्वविश्वक्रियाकलापकारणभूतस्योत्पादकत्वेन तेजोराशित्वं ध्वनितं। तथाच विष्णुपुरा
णे। तत्र विष्णुश्च शक्रश्च जज्ञाते पुनरेव हि। अर्यमा चैव धाता च त्वष्टा पूषा तथैव च। विवस्वान्सविता चैव मित्रो वरुण एव च।

भा॰टी॰ त्वं मनुरंगिरा अदितिरिति आदित्या द्वादश स्मृताः। चाक्षुषस्यांतरे पूर्वमासन्ये तुषिताः सुराः। वैवस्वतेंतरे ते वै आदित्या द्वादश स्मृ-
१३८ ता इति। अथवा द्वादशधा स्थितस्य द्वादशकलात्मकस्य। तदुक्तं माधवाचार्यैः। तपिनी तापिनी धूम्रा मरीचिर्ज्वालिनी रुचिः। सु-
षुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा। कभाद्या वसुदाः सौराः ठडांता द्वादशेरिता इति। यत्र स्तुवनत्रयस्य भूर्भुवः स्वल-
क्षणस्य लन्नैरिपोषकत्वेन धारणसमर्थं स्वामिनमिति यावत्। यज्ञस्य भागो विद्यते येषां ते येषामीश्वरमिंद्रमित्यर्थः।
सुप्युवेजनयामासा यज्ञलोगेश्वरं न स्तुरेश्वरं नस्तुवनस्य भर्त्तारमपि अयस्येति तस्योत्कर्षवद्दतापदसमुदायेन तदु-
त्पादकत्वात्तस्य कोप्यतिशयो ध्वनितः। यस्मिन् हृद् आत्मना लवतीत्यात्मभवः स्वयंभूः वरः पुरुषो विष्णुः भवा-
यजन्मने आस्पदं वक्रवामनावतारो सकलजगत्सृष्टिस्थितिसंहृतिकर्तुरजस्याप्युत्पादकत्वेन तपःसिद्धातिश-
यो ध्वनितः। परिकरोलंकारो व्यंग्यः। तदुक्तं विष्णुपुराणे। मन्वंतरेव संप्राप्ते तथा वैवस्वते द्विज। वामनः कश्यपा- राम
द्विष्णुरदित्यां संबभूव हेति। इदं तद्धृदि मिथुनं वदन्प्रजापतिः। तस्मिन्भवा आदितिः। मरीचिसंभवः कश्यपः। अतएव १३८
स्तुर्जन्मनः एको मरीच्यादिरंतरं यस्य सः। अनेन ब्रह्मतुल्यत्वं। अंगम्भूतमहापुरुषचरितवर्णनस्तुतावामितितः

हरणात् त्रपाद त्रयेमा लोदात्तालंकारः। आत्मसवोलवायेतिवि रोधाभासोपि सवो नवेति द्वं द्वं द्वं देति छेकवृत्यनुप्रासो।
यज्ञभागेश्वरमिति विशेष्यं। परः पुरूप इति च विशेष्यमिति विशेषणप्रक्रमभंगो न शंकनीयः। सम्प्रदायेन संज्ञि प्रतिपाद
कत्वेंश्च वयवार्थेन रुद्रे जकत्वे कपालिपदवन्न विरुद्धं। कारणं तु पुंवेलवायास्यदं वज्र इति पर्याये रेकस्यैवार्थस्य
ग्रहणात् अर्थावृत्तिरलंकारः। शार्दूलविक्रीडितं वृत्तं। तदुक्तं विष्णुपुराणे। अथान्यान्मानसान् पुत्रान् सदृशानात्मनोऽसृ
जत्। भृगुं पुलस्त्यं पुलहं क्रतुमंगिरसं तथा। मरीचिं दक्षमत्रिं च वसिष्ठं चैव मानसानिति। तथा भृगोः ख्यातिर्लवे त्वसत्या
सीत्यति श्च मरीचये इति। तथा॥ षष्टिं दक्षोऽसृजत् कन्या वीरिण्यामिति नः श्रुतिं। ददौ स दश धर्माय कश्यपाय त्रयोदश
ति। तथा मरीचात् कश्यपाजातास्तेऽदित्यादक्षकन्ययेति। इयं सृष्टिर्वैवस्वतमन्वन्तरे। न त्वयं प्राचेतसः पृथुवंशस
मुद्भवो दक्षः तस्यस्वष्टुरेकांतरत्वे कथमिति वेत्। उच्यते स एव दक्षोऽस्त्र उत्पन्न उत्पत्तिदोषः। तथा च विष्णुपुराणे।
दशभ्यस्तु प्रचेताभ्यो मारिषायां प्रजापतिः। जज्ञे दक्षो महाभागो यः पूर्वं ब्रह्मणोऽभवदिति। अत्र प्रतिरथो भवदार
क संहितावालकयुतावो युष्माकं पादवंदनं समुद्भवो दक्षः स्यस्वपुरुं न करोमि। आखंडलेति। तेभर्त्रा आखंड
लसमः सुतो जयंतप्रमितः प्रतः कारणात्। तेत वान्या आशीर्योग्यानतत्तीयवरणार्थे प्रवीर्हहे हेतुत्वेन योज्यौ॥

शा·टी· १३९

पौलोम्याः जयीपौलोम्याः सदृशी भवेतीयमेव तुष्टाशीरित्यर्थः काव्यलिंगोपमानुप्रासाः जातेसत्तुरिति मताभवाश्च
श्वपंदीर्घायुर्वत्सः उत्तस्यकुलनंदनो भव उपविशतां हिष्येति साध्वी शकुंतलाइदं सदृशत्वं भवानित्यर्थंतिरसीक्र
मितवाद्यैतेन तत्र द्रुणागरिष्ठोल्लवानित्य नेनविशेषणाप्रक्रमलंगः परिहृतः अद्धाविधिश्चेति त्रितयं समागतंमिलितं ते
दिष्ट्येति सर्वं वः निदर्शना अद्धादित्रितयोपमस्यकल्पितत्वात् त्रितयं वः समागतमिति पाठे एके केचिन्न दिष्ट्याविशेषव
सुक्तः प्रत्येकं प्राधान्यं तेन साध्वी शकुंतलाश्रद्धेति तत्तिन्न त्रयके या वाक्यत्रयं योजनीयं ततो वो युष्माकं त्रितयं दि
ष्ट्या समागतं चेति योजना तेनाति त्रय समागमात् समालंकारः वित यपदेन समागमे प्रति प्रत्येकं कर्तृत्वं बोधय
ता स्त्रीबालावित्यनयोरत्र ज्ञानकार्येति भावः देवानामपि येदेवा महात्मानो महर्षयः भगवन्निति ते वाच्या या
स्ते षीयोषितस्तथेति भरतो क्ते भगवान्निति संतुष्टिः उद्रोतीति कुसुमंप्रूर्वसुदेति ततः फलं उदेतीत्येवं घनोद राम १३९
यः प्राक् उदेतीत्येवं तदनंतरं पयो जलमुदेतीत्येवं आदिक्रियादीपकं निमित्तनैमित्तिकयोः कार्यकारणयो
रयं पूर्वोक्तः क्रमः अप्राकरणिकेन प्राकरणिकार्थ्यपिता न्मालार्थापत्तिः व्यतिरेकमाह तवप्रसीदस्यपुरः
सर्वंसीपद इति कार्यकारणविपर्ययादतिशयोक्तिः मम शकुंतला पुत्रलाभइत्तिप्रक्रान्तस्य विशेषस्य गम्यत्वे

(1051)

सा॰टी॰ विवरात्विंहे तुत्वेनयोज्यो। ततः क एष इदानीं कृतरक्तामंगलंदारकं मे गात्रसंसर्गेण दूषयति। मातः एव कोपि इ रूषः पुत्र इ
१३५ तिमालिंगति। अनुकूलः परिणामः परिपाको यस्य तत्। त्वं यदा आगतासि तदा मया न प्रत्यभिज्ञातासि मयि तु नरागते त्वया
प्रत्यभिज्ञातः तस्य नु कूलपरिणामता। हृदयस्थः आश्वसिहि पतित्यक्तमत्सरेणानुकंपितासि दैवेन। आर्यपुत्रः खल्वेषः।
अनेनानंदनामकमंगमुक्तं। तल्लक्षणं समागमस्तु यो र्थानामानंदः सन्तु कीर्त्यते इति। स्मृतीति। मोहस्तमो राजरिव मोहतमः
अनेनोपमानेनाज्ञानस्य गाढत्वमुक्तं। उपमासाधकमनंतरमेव वक्ष्यामः। स्मृत्यापि तत्रं दूरीकृतं मोहतमो यस्य तस्य मे
प्रमुखे संमुखे दिष्ट्या दैवेन हे सुमुखि स्थितासि सुमुखीति सालिप्रायं सुमुखस्यैव संमुखे स्थातुं योग्यत्वात् सुमुख
स्य मुखगोपनमेव करोतीति। यत्र दुपरागांते ग्रहीतो उपरागो ग्रहो राहुग्रस्ते त्विंदोर्नव पूष्णि चेत्यमरः। शशिनो रोहिणी
नक्षत्रविशेषः योगं संबंधं समुपागता। अत्र सुखे सुखीति सिमे सिंविति छेकानुप्रासः संदेहसंकरः सकारादीनां दं राम १३५
सान्तराणीमकारादीनामोष्ठ्याक्षराणां बहूनां सत्वात् श्रुत्यनुप्रासः। अनेन सह एकस्यैकवाचकानुप्रवेशलक्षणः सं
करः। आर्याभ्यामीय तंत्र्यामेकवाक्यत्वात् संभवद्वस्तुसंबंधा निदर्शना मोहतम इति एकदेशविवर्तिन्युपमा इति तस्मृतेर्नि

ओ इत्यादिना अरो अ सो इत्येतेन पूर्वभावनामकमङ्गमनुपदिश्नीत न च द्रष्टीत्र अनु वर्त्तावत्स्र विज्ञेयो यथोक्तार्थोपदेशक इति।
सुखाते एहि इमं हन्तीति नियमव्याप्तताये। अनेनाद्यापि त्वत्सामर्थ्यं नियमकारित्वमुक्तं। शकुन्तलायै निवेदयावः। सुं वमीया
वन्मातुः सकाशं गमिष्यामि। मम खल्वनेनात्तो दुष्यतो न खलु। प्रत्याययन्तीति। एतावत्यर्थे प्रत्ययो नोत्पन्न एवेति लावः। विकारको
लोपि प्रकृतिस्थो सदृदम नस्योषधिस्कन्लानमेऽशाशाऽसीदात्मनोऽतागधेयेषु। अथवा यथा सानुमत्या आरब्धा ततथा सं भा
व्यतएतत्। अनेन समयाख्यमङ्गमुक्तं। तल्लक्षणं दुःखस्यापगमो यस्मिन् समयः स निगद्यत इति। वसने इति। परितो धूसरे नो ज्वले। इद
मेव विविधेयी। वसने ऽन्तरीयसंव्याने वसाना नियमेन तप आदिना क्षामं मुखं यस्याः सा। अत्रापाहृतमुखाया मुखस्यैव दर्शना
द्वेषाभ्यामसुखीत्युक्तिः। अनेन नालिङ्गहृस्थितावपि अतिशयलज्जालुत्वं व्यज्यते। सुखापावरणी तु चिरतरकालतद्दर्शनो
त्कण्ठयातदर्थमेव वपुः हृत्तेरिति विना नो चित्यं। इतः तावेकावेणी धर्ये यासा। यतएतादृशी अतएव शुद्धशीला अतिनिष्करुणा
